Barcode : 99999990173120
Title -
Author -
Language - sanskrit
Pages - 96
Publication Year - 1923
Barcode EAN.UCC-13



दक्षिणभारतीग्रन्थमाला. सं—२

श्री

कुन्दमाला

दिङ्नागाचार्यकृता

मा—रामकृष्णकविना

एस्—के—रामनाथशास्त्रिणा च

संशोधिता

इयं

मुम्बय्यां तत्त्वविवेचकाख्यमुद्रणयन्त्रालये

मुद्रापिता.



१९२३

BOMBAY:—Printed by Mr. Y. K. Padwal, at the Tatva-Vivechaka Press, Parel Road, Byculla and Published by Mr. M. Ramakrishna Kavi, M. A. 366, Mint Street, Madras.

Copyright reserved by the publisher.

INTRODUCTION.

The discovery of some of the dramas of Bhâsa in Malabar inspired hopes of research scholars to search for the other lost dramas mentioned in the works of Daśarûpaka &c. The research in Malabar for manuscripts resulted in the recovery of a host of works till now unknown in every branch of the Sanskrit learning. Particularly Bhojadeva's S'ringâraprakâśa, the largest work on poetics ever written in any language, wherein more than ten thousand quotations from the earlier authors are given, excites the admiration and curiosity of the critic. Abhinavabhâratî, a learned commentary on Bharata's Nâṭyaśâstra, Bhâvaprakâs'a, Rûpadîpikâ, Kâvyollâsa etc. have given us the names and sometimes quotations from a number of dramas hitherto unheard of. From various references we know already that Tâpasavatsarâja and Udâttarâghava of Anangaharsha Mayurâja are in no way inferior to Bhavabhuti's dramas. Pratibhâ-cânakya, Mukuṭâditaka, Mudrâsuveda, Devîcandragupta, Vikrântas'ûdraka, Devîpariṇaya, Gangâtarangikâ, Tarangadatta, Padmâvatîpariṇaya &c., were the productions of great poets which are now extinct. The fond hopes of some research scholars in the south to unearth rare dramas are realised to some extent and in a few cases they are rewarded with certain works from which mere verses are quoted in works of Alankara without their names. We have been able to issue a volume of four plays of the *Bhâna* type, written by ancient authors, viz., Vararuchi, Īśvaradatta, Syâmilaka and S'udraka. The scholars who have now read these works have said that the collection forms "the solid contribution to literature." Among many more dramas which we are fortunate to discover or identify, Vatsarâjacarita of S'ûdraka, a fine drama, Vijjika's Kaumudîmahotsava, and Kundamâlâ of Diñgnâga arrest the attention of the research student.

2. Kundamâlâ was found in two public libraries in fragmentary condition and two more fragments were obtained from private collections. When all the fragments were read together they formed a com-

plete drama. But they were full of scribal errors and the Prakrit passages had no Sanskrit rendering along with them. Kundamâlâ presented a living picture and delicate characterisation and certainly revealed the hand of a great poet. Subsequently it was proposed to issue this work as the second in our series.

The manuscript materials used in the preparation of this edition :—

Two Mss., one in Telugu characters, another in Grantha script in the Tanjore Palace Library, in which the Telegu Ms. was copied about 150 years ago from the Grantha transcript. Unfortunately the Telugu copy is not only injured but is full of errors committed by the scribe in deciphering his Grantha original, which is also faulty and injured ;

Two Mss. from the Government Oriental Library, Mysore, in which one is a Kanarese transcript and another in Grantha script, the latter seems to be the original for the former or both of them might have been copies of a common original now extinct.

Both the transcripts of the Tanjore Library want the beginning and they are defective by a number of lacuna in the fifth and sixth acts, while both the Mysore transcripts lost the latter half of the first act, the whole of the second and the beginning of the third act and it seems that in the sixth act the very first original from which the two transcripts were prepared was broken in the middle of the leaf missing one half of it. Two other fragments had only a few verses each.

The present edition is based upon these transcripts. The whole of the second act which is found only in the Tanjore Mss, and which unhappily abounds in Prakrit speeches where the best scribe blunders, is, in spite of all our efforts, still unsatisfactory. None of the transcripts contain the Sanskrit rendering of the Prakrit passages and we are solely responsible for any bad workmanship which the reader may find anywhere. It is hoped that time may grant us one good manuscript to immortalise the author's words in purity.

3. The prologue in the Mysore transcripts gives out that the work was composed by Dińgnâga, an inhabitant of Arârâlapura

The copies of the Tanjore Palace Library have lacuna here ; but at the end of the drama the scribe says that it was by Dhîranâga of Anûpurâdha (अनूपुराधस्य कवेर्धीरनागस्य). Now the question arises about the authorship. Diñgnâga was the celebrated Buddhist logician and in Sûktimuktâvali, an epithet Bhadanta is attached to the name Dhîranâga. Thus both the writers are the Buddhists. Does a Buddhist condescend to write on the theme of Rama's exploits? Of course Kumâradâsa, the author of Jânakîharana will answer the question in the affirmative. Now how to decide the authorship between them? In the manuscript copy of Vallabhadeva's Subhâshitâvali, which in the beginning contains a number of verses of various poets which are missing in the printed edition, the second verse of this drama is given under Diñgnâga. The work itself is mentioned by S'âradâtanaya in his Bhâvaprakâśa in the following terms :—

कुन्दमालाख्य सुविष्टा सन्धिपञ्चकसंयुता. (VI. Adhi)

The latter portion of the *prastâvanâ* (prologue) is found quoted in Sâhityadarpaṇa by Visvanâtha. The verse,

द्यूते पणः प्रणयकेलिषु कण्ठपाशैः
क्रीडापरिश्रमहरं व्यजनं रतान्ते
शय्या निशीथकलहे हरिणेक्षणायाः
प्राप्तं मया विधिवशादिदमुत्तरीयम् ॥

is found quoted in two places (IX, XIII Pra.) in S'ringâra Prakâs' by Bhojadeva, and the same verse is given in Mahânâtaka which is older than S'âradâtanaya (1150 A. D.). Bahurûpamis'ra and the anonymous author of Kâvyakamadhenu mention this drama by name. We are disposed to think from the peculiarities in the Prakrit speeches that the work reveals the literary development of Prakrit of the fourth and fifth centuries A. D. And we have no reasons to doubt the authenticity of the transcripts that we have examined and the quotation in the Subhâshitâvali in ascribing the work to Diñgnâga.

Diñgnâga was a prolific writer on the Buddhist philosophy and Nyâyapraves'a is now available to scholars. His views were criticised by Vindhyavâsin, whom we can identify with Vyâḍi who is different

from his namesake, a contemporary of Vararuchi. Vindhyavâsin was in his turn attacked by Dharmakîrti who is generally known as Bhikshu in the writings of the later Mimansakas. Kumârila criticises the views of Bhikshu. Prof. Ui in his valuable introduction to the edition of Das'apadârthi opines that Diñgnâga must have flourished about the first quarter of the fifth century A. D. This date for Diñgnâga agrees with a number of synchronous references. In Meghasandes'a, its commentator, Mallinâtha, commenting on the verse—

"स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्."

interprets the lines to bear a latent ridicule to the poet, Diñgnâga, as intended by Kalidasa. Some modern scholars are disposed to think that Mallinâtha was somewhat far-fetched and that there is no warranty for any such meaning. Now we find that Dakshiṇâvartanâtha, an older commentator on the same than Mallinâtha and of about 1100 A. D has an elaborate reference pointing to the same conclusion in the following words :—

सरसनिचुलादीत्यत्र [निचुलपदेन निचुलाभिधानः कश्चन कविर्विवक्षितः, यस्य सूक्तिः सुभाषिते श्रूयते—

संसर्गजा दोषगुणा भवन्ती-
त्येतन्मृषा येन जलाश्रयोऽपि ।
स्थित्वातटकूलं निचुलश्चलन्त-
मात्मानमारक्षति सिन्धुवेगात् ॥ इति

अनया निचुलोपवर्णनया तस्य कवेर्निचुलाभिधानत्वमासीदित्यनुसन्धेयम् । स तु निचुलकविरास्थानगतः कालिदासस्य सूक्तिः सम्भावयति । तस्मात्सरसपदेन तं कविं स्तौति । दिङ्नागानाम्—अनेन दिङ्नागाचार्यो विवक्षितः । स्थूलहस्तावलेपान्—अनेन प्रबन्धदूषणसमये स्थूलहस्ताभिनयाश्च विवक्षिताः । अयमभिप्रायः-दिङ्नाग इति कोऽप्याचार्यः कालिदासप्रबन्धानन्यत्रोक्तोऽयमर्थ इति स्थूलहस्ताभिनयैर्दूषयति । तमाचार्यं स्वप्रबन्धस्यापूर्वार्थाभिधायित्वमाश्रित्य मेघोपदेशव्याजेन कविरुपालभत इति ।

Thus Diñgnâga, Nichula and Kâlidâsa seem to be contemporaries whom we associate with one Vikramâditya, Pravarasena and Kumâra-

dâsa. Bhojadeva in his S'ringâraprakâs'a (IX Prak,) says that Kâlidâsa who was sent on an embassy to the court of a Kuntala King was enquired by Vikramâditya into the doings of the Kuntala king and Kâlidâsa replied:—

असकलहसितत्वात् क्षालितानीव कान्त्या
मुकुलितनयनत्वाद्व्यक्तकर्णोत्पलानि ।
पिबति मधुसुगन्धीन्याननानि प्रियाणां
त्वयि विनिहितभारः कुन्तलानामधीशः ॥

Vikramâditya having read पिबति with त्वयि together meaning thereby "when you were sucking" attacked Kâlidâsa as to what he meant. This will show that Kâlidâsa was sent as an ambassador by Vikramâditya to a King of Kuntala. Kshemendra seems to certify this statement by his quotation from Kalidasa's Kuntesvaradautya, which is evidently an error for Kuntaleśvara-dautya. Who was this Kuntala king? The commentator on the Setubandha has the following to our rescue:—

धीराणां काव्यचर्चाचतुरिमविधये विक्रमादित्यवाचा
यं चक्रे कालिदासः कविकुमुदविधुः सेतुनामप्रबन्धम् ।

The author of Bharatacarita explicitly says in the following verse that the author of Setubandha was a King of Kuntala,

जडाशयस्यान्तरगाधमार्ग-
मलङ्घरन्ध्रं गिरिचौर्यवृत्त्या ।
लोकेष्वलंकान्तमपूर्वसेतुं
बबन्ध कीर्त्या सह कुन्तलेशः ॥

From these references we are tempted to identify the Kuntala King of Kâlidâsa's embassy with Pravarasena, the author of Setubandha which might have been retouched by Kâlidâsa. Pravarasena, the King of Vâkâṭakas, who descended from Elichpur in the Central Provinces into the country bordering the Godavari defeating the Kadambas who were its rulers, fixed his capital at Râmagiri thirty miles north of Warangal, from which the immortal cloud of Kâlidâsa starts on an amorous embassy. Pravarasena II of the Vâkâṭakas is epigraphically assigned to 420 A. D.

Kumâradâsa, the King of Ceylon, is said in the Singhalese tradition to have died on the funeral pyre of Kâlidâsa and the annals of Ceylon give the same date (420 A. D.) to that sovereign poet. From all these references Diñgnâga, a contemporary of these poets may be placed in the first quarter of the fifth century.

We are unable to identify Arârâla-pura with any known places. The peculiarities in the old Grantha script which easily lead to erroneous deciphering, suggest that the word might have been Anûrâdhapura in Ceylon. The Singhalese tradition further states that Nichula wrote a work called Taralâ and that he was a native of that island.

4. *Kundamâlâ as a drama.*

The banishment of Sita by Rama stirs up even the hardest heart and Bhavabhuti almost in a language of ecstacy endeared the reverent name of Sita as a perfection of purity and innocence to all the world. Diñgnâga's work without any poetic or histrionic conventions, which Bhavabhuti used to a degree of unnaturalness, is in a natural and graceful conduct of events exhibits the various phases of separation (विप्रलम्भकरुणरस) in concise and natural expression which can be easily developed producing a kaledeiscopic effect on the mind of the reader by a poet of Bhavabhuti's ability. Some passages in Kundâmâla, especially those in Prakrit uttered by Sita, touch the heart very deeply.

We do not propose to go into the merits of the drama, for the readers are indeed better critics and will surely appreciate the delicate shades of the poet's art.

We most gratefully acknowledge every kind of help offered to us in bringing out this edition by **M. R. Ry. Brahmasri K. Nageswara Row Pantulu Garu**, the *Editor of Andhra Patrika*, the famous Telugu daily in South India. We offer our hearty thanks to Mr. Y. K. Padwal, the Printer, Tattvavivechaka Press, for executing the printing of the work to our best satisfaction.

M. RAMAKRISHNA KAVI,
S. K. RAMANATHA SASTRI,

Madras 1923.

कुन्दमालापद्यानामकाराद्यनुक्रमणिका.

अतिप्रसादादस ५२
अथाभिषेक ७०
अनुकृति ७६
अन्तरिता अनु ५५
अन्यांशुक ४६
अपत्यमिष्टं ८२
अपि नाम ६३
अभिनव २७
अमी पतद्भिः २
अभ्युद्धृतिश्च ८०
अयं मवद्भ्यां ६१
अविघ्नमस्तु ८२
अविदितं ४८
असौ तनुत्वात् २८
अस्मिन् कपोल ४१
अस्मिन् सन्निव ४१
अहं रामः ४०
आकर्ण्यजङ्घ १४
आकर्षात्प्रग्रहा ५१
आकृष्टा मिथिला ७८
आदाय पङ्कज ३
आनाकमेक ४०
आपाण्डरेण ४३
आपातमात्रेण ५९
आर्यस्यादेशः ५
आयं मित्रं ११
आर्या निर्वासिता ९
आर्या स्वहस्तेन १०
आशामुखे ८०
आसीदियस्सु ५३
इक्ष्वाकूणा १७
इमं सन्देशं ९
उदन्वन्तः ७७
उन्नतौ विन्ध्य ७९
उपयेमे ततः ६९
उपयेमे ततः ७०
ऋषयः ८०
ऋषीणां ७
एतत्कुमार ६७
एतज्ज्योतिः ७८
एतस्मिन् कुश १७
एतस्मिन् वीतत ४१
एतां वेत्रलतां २८
एतास्तिस्रः ६३
एते रुदन्ति १०
एषच्छत्रं ८२
एषा वधूः ११
एषोऽजलिः १२
कदा वाहूप ४५
कनकेन रूप ७०

किसलय ३१
कुशलव ७६
कौसल्यापाद १७
कौसल्यासुषुवे ७०
गाढमालिङ्ग ४५
जनकदुहितरं ४६
जयति दशरथः... ... ... ८०
जरसा पलितः ७०
जातश्रमां १२
जातावस्था ७३
जम्भारिमौलि १
ज्येष्ठस्य भ्रातुः... ... ... ११
ज्योतिः सदाभ्यन्तर ५६
ज्वालेवोर्ध्वं १
ततो बध्वा ७०
ततः प्राणैः ७१
ततः श्रुत्वा ७२
तरक्षः ४
तस्याः स्वहस्त... ... ... ५२
तीर्थोदकानि २४
तुल्यान्वयेति ६
तृषितेन ५०
त्यक्ताकिल ६
त्वदर्शनेन ८४
त्वं देवि ८
त्वं बिभर्षि ७९
दावाग्निं ४०
दुःखे सुखेषु ५४
देवि विज्ञा ४५
द्यूते पणः ४७
धर्मेण जित १५
धावन्ति हरिण १८
न चैतदभि ५७
नरपतिरधिक ५५
नादः पाताल ७८
नीतस्तावत् २६
परिपूर्णे ततः ७३
पातयति सा २६
पुरन्दरस्य ८३
पूर्वं वन ३२
प्रकामभुक्ते ५
प्रथमं २५
प्रमादः २५
प्रविश्य ३४
प्राप्तराज्यः ७१
प्रियजनरहिता ५१
बाल्ययौवन ७०
बाष्पपर्याकुल ७१
भवति शिशु ६१
भवन्तौ ६८
भागीरथी ६
भो भो हिंस्राः १३
मध्याह्नार्क ३५
मन्दं वाति ३४
मया तु मन्द ७३
मरकत २६

महाशीलैः ६९
महाराज ८३
मामामनन्ति ७९
मुक्त्वा वसन्त ४२
मुक्ताहार २६
मुनीनां... ... ... ४१
मैथिलि ७४
मैथिली ८३
यशाज्ञानां ७९
यास्वयं ८१
यां यामवस्थां ६२
ये केचिदत्र १२
रामं दाशरथिं ८०
लङ्केश्वरस्य १
वामेन नीवार ४
वाल्मीकिना ६८
विलासयोगेन २९
वैदेह्याः ४३
व्याप्य द्यावा ७९
व्यायाम... ... ... ३४
स एष रामः ७२
सख्यो नद्यः १३
सचकित ४१
सन्तप्य लोक ५१
समानं २९
सवनमवासितं ५२
सीतां निर्जनं ७१
सीता विरह ४२
सुराभिकुसुम ४०
सोऽहं चिरन्तन... ... ... १६
स्खलति मुहुः ३९
स्थाणुर्वेधाः ८४

श्रीः

कुन्दमाला.

दिङ्नागाचार्यप्रणीता.

प्रथमोऽङ्कः

जम्भारिमौलिमन्दारमालिकामधुचुम्बिनः ।
पिबेयुरन्तरायाङ्घ्रेर्हरम्बपदपांसवः ॥ १ ॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

ज्वालेवोर्ध्वविसर्पिणी परिणतस्यान्तस्तपस्तेजसो
गङ्गातोयतरङ्गसर्पवसतिर्वल्मीकलक्ष्मीरिव ।
सन्ध्येवार्द्रमृणालकोमलतनोरिन्दोः सदास्थायिनी
पायाद्वस्तरुणारुणांशुकपिला शंभोर्जटासन्ततिः ॥ २ ॥

आदिष्टोऽस्मि परिषदा—तत्रभवतोऽरारालपुरवास्तव्यस्य कवेर्दिङ्नागस्य कृतिः कुन्दमाला नाम, सा त्वया प्रयोक्तव्येति । तद्यावदस्य सन्दर्भस्य प्रयोगसाचिव्यविधायिनीमार्यामाहूय रङ्गभूमिमवतरामि ।

(नेपथ्ये)

इत इतोऽवतरत्वार्या ।

सू—अये कोनु खल्वयमार्यासमाह्वानेन सहायमिव मे संपादयति ।

(विलोक्य) कष्टं भोः ! कष्टं भोः ! अतिकरुणं वर्तते—

लङ्केश्वरस्य भवने सुचिरं स्थितेति रामेण लोकपरिवादभयाकुलेन ।
निर्वासितां जनपदादपि गर्भगुर्वीं सीतां वनाय परिकर्षति लक्ष्मणोऽयम् ॥ ३ ॥

(इति निष्क्रान्तः)

स्थापना.

—•+•—

(ततः प्रविशति रथाधिरूढा सीता सारथिर्लक्ष्मणश्च)

ल—इत इतोऽवतरत्वार्या । एतानि गहनतरुलताप्रतानसंरुद्धतया रथप्रवेशायोग्यानि भागीरथीतीरकाननानि । तदवतरत्वार्या ।

सी—वच्छ, लक्ख्वण, अदिप्पउत्ततुरंगमवेअकंपिअदेहा एत्थ ण पारेमि संठादुं, किं पुण ओदरिदुं । (वत्स, लक्ष्मण, अतिप्रवृत्ततुरङ्गमवेगकम्पित-देहा न पारयामि संस्थातुं, किं पुनरवतरितुम्).

ल—सुमन्त्र, ननु तुरङ्गमनियमने क्रियतां यत्नः ।

सु—क्रियमाणमपि यत्नमतिवर्तन्ते गान्धर्वप्रिया वाजिनः । तथा हि—

अमी पतद्भिः श्रवणेष्वमन्दं विकृष्यमाणाः कलहंसनादैः ।
अनाश्रवाः प्रग्रहसंयमस्य तुरङ्गमास्तूर्णतरं प्रयान्ति ॥ ४ ॥

ल—सुमन्त्र अतिरभसप्रवृत्तवेगत्वादनालक्षितसमविषमास्तुरङ्गमा गङ्गा-प्रपाते स्यन्दनं विनिपातयन्ति, तत् सर्वात्मना क्रियतां यत्नः ।

सु—(रज्ज्वाकर्षणमभिनयति)

ल—एष स्थितो रथः, तदवतरतु देवी।

सी—(अवतीर्य परिक्रामति)

ल—सुमन्त्र दीर्घमार्गपरिश्रान्ता एते तुरङ्गमाः, तद्विश्रामयैतान् ।

सु—यदाज्ञापयति देवः । (इति रथमधिरुह्य निष्क्रान्तः)

ल—(परिक्रम्य, आत्मगतम्)

समादिष्टोऽहमार्येण, अथवा स्वामिना—वत्स लक्ष्मण, देव्याः किल सीताया रावणभवनसंस्थानाच्चारित्रं प्रति समुत्पन्नविमर्शानां पौराणामन्या-दृशाः प्रलापाः प्रवर्तन्ते, तन्न शक्नोमि सीतामात्रस्य कृते शरच्चन्द्रनिर्मलस्ये-

क्ष्वाकुकुलस्य कलङ्कमुत्पादयितुम् । सीतया चाहं गर्भिणीभावसुलभेन दौह-
देन भागीरथीदर्शनं प्रार्थितः । तस्मात्त्वमनेन गङ्गागमनव्याजेन सुमन्त्रा-
धिष्ठितं रथमारोप्य कस्मिंश्चिद्वनोद्देशे परित्यज्य निवर्तस्व—इति । तदह-
मपि स्वजनविस्रंभनिर्विशङ्कां देवीमादाय गृहहरिणीमिव वध्यभूमिं वन-
मुपनयामि ।

सी—वच्छ लक्खण, अदिसइदगब्भभरुव्वहणपरिस्संता ण प्पहवंति मे चलणा । ता अग्गदो भविअ णिइवेहि कीसदूरे भअवई भाईरई वट्टदित्ति । (वत्स लक्ष्मण अतिशयितगर्भभरोद्वहणपरिश्रान्तौ न प्रभवतो मे चरणौ । तदग्रतो भूत्वा निवेदय कियद्दूरे भगवती भागीरथी वर्तत इति)

ल—नन्वासन्नैव भगवती भागीरथी, तदलं विषादेन; संप्राप्ता एव वयम् । पश्य—

आदाय पङ्कजवनान्मकरन्दगन्धान्
कर्षन्नितान्तमधुरान् कलहंसनादान् ।
शीतास्तरङ्गकणिका विकिरन्नुपैति
गङ्गानिलस्तव सभाजनकांक्षयेव ॥ ५ ॥

सी—(स्पर्शं नाटयति) संपदं जणणीकरप्परिससुहसीअलस्स भाई-
रईतरंगमारुदस्स परिसेण परिस्समस्स विअ पावस्स परिरुवओ जाओ, तह वि दोहदकुदूहलं गंगावगाहणे मं समुस्साहेदि । ता इमादो तडप्पपादादो जह परिस्संता ओदरामि तह आदेसेहि मे मग्गम् ।

(सांप्रतं जननीकरस्पर्शसुखशीतलस्य भागीरथीतरङ्गमारुतस्य स्पर्शेन परिश्रमस्येव पापस्य परिक्षयो जातः; तथापि दोहदकौतूहलं गङ्गावगाहने मां समुत्साहयति । तदस्मात्तटप्रपाताद्यथा परिश्रान्तावतरामि तथादेशय मे मार्गम्)

ल—(निर्दिश्य) अत्यन्तविश्रान्तमनुष्यसञ्चारतया दुरवतारास्तट-प्रदेशाः । तस्मात्प्रपदमास्थाय सम्यक्—

वामेन नीवारलतां करेण जानुं समालंब्य च दक्षिणेन ।
पदे पदे मे पदमादधाना शनैःशनैरेतु मुहूर्तमार्या ॥ ६ ॥

सी—(यथोक्तमवतीर्य) वच्छ सु परिस्संतंमि, एतस्सिं पाअव-च्छायाए मुहुत्तं उपविसिअ विस्समिस्सं ।

(वत्स सुष्ठु परिश्रान्तास्मि; एतस्यां पादपच्छायायां मुहूर्तमुपविश्य-विश्रमिष्यामि)

ल—यदभिरुचितं देव्यै ।

सी—(उपविश्य विश्रान्तिं नाटयति)

ल—अहो असंहार्यपरिच्छदाः सुकृतिनः । तथा हि—

तरङ्गा वीजन्ते सजलकणिकान् शीतमरुत-
स्तथैते सङ्गीतं दधति कलहंसाः कलगिरः ।
सखीव च्छायेयं रमयति परिष्वज्य हृदयं
वने शून्येऽप्यस्मिन् परिजनवती वात्रभवती ॥ ७ ॥

सी—जह भणिदं कुमारेण, सअणमज्झगदाए विअ एत्थ अहिरमदि मे हिअअं । (यथा भणितं कुमारेण, शयनमध्यगताया इवात्राभिरमते मे हृदयम्)

ल—(आत्मगतम्) एषा विश्रान्ता सुखोपविष्टा च देवी, तदयमेवावसरो यथास्थितं व्यवसितुम् । (प्रकाशम्) (सहसा पादयोर्निपत्य) अयमनवरतप्रवासदुःखभागी निर्लक्षणो लक्ष्मणो विज्ञापयति—स्थिरीक्रियतां हृदयम् ।

सी—(ससंभ्रमम्) अवि कुसलं अंअउत्तस्स ?। (अपि कुशलमार्य-पुत्रस्य)

ल—(वनं निर्दिश्य) एवं गते कीदृशं कुशलमार्यस्य ? ।

सी—अज्जूए केकईए पुणो वि समादिट्ठो वणवासो ? (अंबया कैकेय्या पुनरपि समादिष्टो वनवासः)

ल—समादिष्टो वनवासः, न पुनरंबया ।

सी—केण उण समादिट्ठो ? । (केन पुनः समादिष्टः)

ल—आर्येण ।

सी—कहं समादिट्ठो ? । (कथं समादिष्टः)

ल—(बाष्पस्तंभमभिनीय)

आर्यस्यादेश इत्येव वक्तुमिच्छामि यद्व्रतः ।
तथापि हृदयं गत्वा ग्रन्थिं बध्नाति भारती ॥ ८ ॥

सी—किं मम समादिट्ठो वणवासो ? । (किं मम समादिष्टो वनवासः)

ल—न केवलं तव, आत्मनोऽपि ।

सी—कहं विअ ? । (कथमिव)

ल—प्रकामभुक्ते स्वगृहाभिमानात्
सुहृज्जनेनाहितयागवह्नौ ।
आर्यस्य रम्ये भवनेऽपि वास-
स्तव प्रवासे वनवास एव ॥ ९ ॥

सी—वच्छ, परिप्फुडं कहेहि, अज्ज कहं मम वणवासो अंअउत्तस्स वणवासोत्ति ? । (वत्स परिस्फुटं कथय, अद्य कथं मम वनवास आर्यपुत्रस्य वनवास इति)

ल—किमपरं कथयामि मन्दभाग्यः ।

त्यक्ता किल त्वमार्येण चारित्रगुणशालिना ।
मयापि किल गन्तव्यं त्यक्त्वा त्वामिह कानने ॥ १० ॥

सी—हा ताद, अय्य कोसलाहिप, अज्ज उवरदोसि । (हा तात आर्य कोसलाधिप अद्योपरतोऽसि) (मोहं गच्छति)

ल—(ससंभ्रमम्) कष्टं भोः ! कष्टं भोः ! निर्घातपातदारुणेनानेन परित्यागवार्ताश्रवणेन नूनमुपरता देवी । (निर्वर्ण्य) दिष्ट्या श्वसिति । तत्को नु खल्वस्याः प्रत्यानयनेऽभ्युपायः । (विषादं नाटयति) आश्चर्यमाश्चर्यम्—

भागीरथीशीकरशीतलेन संभाव्यमाना मृदुनानिलेन ।
मन्दाग्यशेषेण च बोध्यमाना प्रत्यागता राजसुता कथञ्चित् ॥ ११॥

सी—वच्छ लक्खण, किं गदोसि ? (वत्स लक्ष्मण, किं गतोऽसि)

ल—आज्ञापय, तिष्ठाम्येष मन्दभाग्यः ।

सी—किं उवालंभिअ अंमि परिच्चत्ता । (किमुपालभ्यास्मि परित्यक्ता)

ल—कीदृशो देव्या उपालम्भः ?

सी—अहो मे अधण्णत्तणं, किं उवालम्भमेत्तेण विणा णिगहिदंम्हि । किं आत्थि किं वि देण संदिट्ठं ? (अहो मेऽधन्यत्वम्, किमुपालंभमात्रेण विना निगृहीतास्मि । किमस्ति किमपि तेन सन्दिष्टम्)

ल—अस्ति ।

सी—कहेहि कहेहि । (कथय कथय)

ल—**तुल्यान्वयेत्यनुगुणेति गुणोन्नतेति**
दुःखे सुखे च सुचिरं सहवासिनीति ।

जानामि केवलमहं जनवादभीत्या

सीते त्यजामि भवतीं न तु भावदोषात् ॥ १२ ॥

अयमार्यस्य सन्देशः ।

सी—कहं जणवादभयेणेत्ति । किंवि वअणीअं मे अत्थि ? (कथं जनवादभयेनेति । किमपि वचनीयं मेऽस्ति)

ल—कीदृशमार्याया वचनीयम् ।

ऋषीणां लोकपालानामार्यस्य मम चाग्रतः ।

अग्नौ शुद्धिं गता देवी किन्तु–

सी—(लज्जां नाटयति) कहेहि, किंतु–(कथय किन्तु)

ल—लोको निरङ्कुशः ॥ १३ ॥

सी—अग्गिसुत्थिसंकित्तणेण पडिबोदिदम्हि रावणभवणउत्तंतो, पुणो वि उब्बादिअदि सीदाए वि णाम एव्वं संभावीअदित्ति । सव्वहा अलं महिलत्तणेण ! । एव्वं परिच्चत्ता णु परिच्चत्तम्हि किं ण खु जुत्तं मम अंअउत्तपरिच्चत्तं अत्ताणं परिच्चइदुं, किं ण खु तस्स एव्व णिरनुक्कोसस्स समाणो एसो पसओ पेक्खिदव्वोत्ति वअणीअकंटकोपहिदं जीविदं परिरक्खामि ।

(अग्निशुद्धिसंकीर्तनेन प्रतिबोधितास्मि रावणभवनवृत्तान्तः, पुनरप्युद्बाधयति सीताया अपि नाम एवं संभाव्यत इति । सर्वथालं महिलात्वेन । एवं परित्यक्ता। ननु परित्यक्तास्मि किं न खलु युक्तं ममार्यपुत्रपरित्यक्तमात्मानं परित्यक्तुं किं न खलु तस्यैव निरनुक्रोशस्य समान एष प्रसवः प्रेक्षितव्य इति वचनीयकण्टकोपहितं जीवितं परिरक्षामि)

ल—अनुगृहीतोऽस्मि । (उत्थाय प्रणमति) इदमपरमार्येण सन्दिष्टम् ।

सी—किं णु खु भविस्सदि । (किं नु खलु भविष्यति)

ल—त्वं देवि चिरनिहिता गृहदेवता मे
स्वप्नागता शयनमध्यसखी त्वमेव ।
दारान्तराहरणनिःस्पृहमानसस्य
यागे तव प्रतिकृतिर्मम धर्मपत्नी ॥ १३ ॥

सी—एव्वं संदिशंतेण अंअउत्तेण परिच्चाअदुक्कं मयि निरवसेसं अवणीदं; णहि तह अण्णासत्ता पइणो, इत्थिआजणस्स दुक्कं उप्पादेदि जह अण्णासत्तो ।

(एवं सन्दिशतार्यपुत्रेण परित्यागदुःखं मयि निरवशेषमपनीतम्; नहि तथान्यासक्ता पत्युः, स्त्रीजनस्य दुःखमुत्पादयति यथान्यासक्तः)

ल—कः प्रतिसन्देशः ?

सी—कस्स ? । (कस्य)

ल—आर्यस्य ।

सी—एव्वं गदेवि पडिसंदेशो । अज्जूणं उण मम वअणादो पादवंदणं कदुअ विण्णवेहि—एव्वं अहं णीरव्वा सावदसमाइण्णे वणे पडिवसंती अ सव्वहा हिअएण अय्याहिं अणुगहीदव्वेत्ति ।

(एवं गतेऽपि प्रतिसन्देशः !। श्वश्रूणां पुनर्मम वचनात्पादवन्दनं कृत्वा विज्ञापय—एवमहं नीरक्षा श्वापदसमाकीर्णे वने प्रतिवसन्ती च सर्वथा हृदयेनार्याभिरनुगृहीतव्येति)

ल—प्रतिगृहीतेयमाज्ञा । आर्यस्य न किञ्चित्सन्दिष्टम् ?

सी—तह णिट्ठुरो णाम संदीसीअदित्ति अप्पडिहदवअणदा एसा लव्वणस्स, ण सीदाए वण्णत्तणं । तह मम वअणादो तं जणं विण्णवेहि—मंदभाइणीं अणुसोअंतो वण्णस्समपरिवालणं अहिग्घंतो अत्ताणं ण बाधेहि, सद्धंमे ससरीरे सावधाणो होहित्ति । वच्च लव्वण, किं उवालं-

भामि महाराअं ? (तथा निष्ठुरो नाम सन्दिश्यत इत्यप्रतिहतवचनतैषा लक्ष्मणस्य, न सीताया धन्यत्वम् । तथा मम वचनात्तं जनं विज्ञापय—मन्दभागिनीमनुशोचन् वर्णाश्रमपरिपालनमभिघ्नन्नात्मानं न बाधय, सद्धर्मे स्वशरीरे सावधानो भवेति । वत्स लक्ष्मण किमुपालभे महाराजम् ?)

ल—किमेतावत्यपि न प्रभवति देवी ?

सी—एव्वं वि तं जणं विण्णवेहि—ण जुत्तं तव णिरपराहं इमं जणं सपदि हिअआदो णिव्वसिदुं, किं उण विसआदोत्ति । (एवमपि तं जनं विज्ञापय—न युक्तं तव निरपराधमिमं जनं सपदि हृदयतो निर्वासयितुं किं पुनर्विषयत इति)

ल—सन्देष्टव्यमार्यया सन्दिष्टम्—

* आर्या निर्वासिता नाम हृदयात्मभविष्णुना ।
कथं गृहाद्गृहं नाम कथं जनपदादपि ॥ १४ ॥

सी—एव्वं वि मम वअणादो विण्णविदव्वो—सा तपोवणवासिणी सव्वहा सीमण्टअणिहिदेण अंजलिणा विण्णवेदित्ति जइ अहं णिग्गुणा चिरपरिचिदेत्ति वा, अणाहेत्ति वा, सीदेत्ति वा सुमरणमेत्तएण अणुग्गहिदव्वेत्ति । (एवमपि मम वचनाद्विज्ञापयितव्यः—सा तपोवनवासिनी सर्वथा सीमन्तनिहितेनाञ्जलिना विज्ञापयति, यद्यहं निर्गुणा चिरपरिचितेति वा, अनाथेति वा, सीतेति वा स्मरणमात्रकेनानुगृहीतव्येति)

ल—इमं सन्देशमाकर्ण्य क्षते क्षारमिवाहितम् ।
दशामसह्यां शोकस्य व्यक्तमार्यो गमिष्यति ॥ १५ ॥

सी—अदिमहिदे वि सअमंडले कहं तुमं सोंति एत्तिआ दुव्वसहाया, संपदं मए विणा तए एक्केण एसो चिंतिदव्वो । तुमं बादुस्सरीरे सावहाणो

होहिसि । (अतिमहितेऽपि स्वमण्डले कथं ते सन्ति स्त्रियो दुःखसहायाः । सांप्रतं मया विना त्वयैकेनैष चिन्तयितव्यः । त्वं भ्रातुःशरीरे सावधानो भवेति)

ल—अनुरूपमेतन्महानुभावतायाः ।

सी—वच्छ लक्खण, पणमिदव्वा तुए मम वअणादो राहवउलराअधाणी भअवदी अयोज्जा, सुस्सूसिदव्वो पडिमागदो महाराओ, साहिदव्वा अज्जूणं आणत्ति, समस्सासिदव्वा पिअंवदा मम पिअसहीओ, सुमरिदव्वा सव्वकालं मंदभाइणी । (इति रोदिति) (वत्स लक्ष्मण प्रणमितव्या त्वया मम वचनात् राघवकुलराजधानी भगवत्ययोध्या, शुश्रूषितव्यः प्रतिमागतो महाराजः, साधयितव्या श्वश्रूणामाज्ञप्तिः, समाश्वासयितव्या प्रियंवदा मम प्रियसख्यः, स्मर्तव्या सर्वकालं मन्दभागिनी)

ल—(सोद्वेगम्) आर्यां स्वहस्तेन वने विमोक्तुं
श्रोतुं च तस्याः परिदेवितानि ।
सुखेन लंकासमरे हतं मा-
मजीवयन्मारुतिरात्तवैरः ॥ १६ ॥

(विलोक्य)

एते रुदन्ति हरिणा हरितं विमुच्य
हंसाश्च शोकविधुराः करुणं रुदन्ति ।
नृत्तं त्यजन्ति शिखिनोऽपि विलोक्य देवीं
तिर्यग्गता वरममी न परं मनुष्याः ॥ १७ ॥

सी—वच्छ लक्खण, आसण्णात्थमयो सूरो । दूरे अ इदो माणुस संपादो । उड्डीणा पक्खिणो । संचरंति सापदा । गच्छ, ण जुत्तं परिलंबिंदुम् ।

(वत्स लक्ष्मण, आसन्नास्तमयः सूर्यः । दूरे चेतो मानुषसंपातः । उड्डीनाः पक्षिणः । सञ्चरन्ति श्वापदाः । गच्छ न युक्तं परिलंबितुम्)

ल—(अञ्जलिं बध्वा) सर्वपश्चिमोऽयं लक्ष्मणस्य प्रणामाञ्जलिः । तत्सावधानं परिगृह्यताम् ।

सी—णिच्चावहिदा खु अहं । (नित्यावहिता खल्वहम्)

ल—विज्ञापयामि देवीम्—

आर्यं मित्रं बान्धवान् वा स्मरन्त्या
शोकादात्मा मृत्यवे नोपनेयः ।
इक्ष्वाकूणां सन्ततिर्गर्भसंस्था
सेयं देव्या यत्नतो रक्षणीया ॥ १८ ॥

सी—अप्पडिहदवअणो खु सोमित्ती । (अप्रतिहतवचनः खलु सौमित्रिः)

ल—इयमपरा विज्ञापना ।

सी—का अण्णा ? । (कान्या)

ल—ज्येष्ठस्य भ्रातुरादेशादानीय विजने वने ।
परित्यक्तासि देवि त्वं दोषमेकं क्षमस्व मे ॥ १९ ॥

सी—(ससंभ्रमम्) जेट्ठवअणाणुवत्ति तुमेत्ति परितोसकाले को दोसो आसंकीअदि ?

(ज्येष्ठवचनानुवर्ती त्वमिति परितोषकाले को दोष आशंक्यते)

ल—(सप्रदक्षिणं प्रणम्य परिक्रामति)

सी—(रोदिति)

ल—(दिशोऽवलोक्य) भो भो लोकपालाः, शृण्वन्तु भवन्तः—

एषा वधूर्दशरथस्य महारथस्य

सी—अदि सिलाहणिज्जाइं अरुवराइं सुणीअंदि । (अतिश्लाघनीयान्यक्षराणि श्रूयन्ते)

ल—रामाह्वयस्य गृहिणी मधुसूदनस्य ।

सी—कुदो मे तादिसो बाहधेओ ? (कुतो मे तादृशो भागधेयः)

ल—निर्वासिता पतिगृहात्—

सी—(कर्णौ पिदधाति)

ल—विजने वनेऽस्मिन्

एकाकिनी वसति रक्षत रक्षतैनाम् ॥ २० ॥

सीता—(गर्भं दर्शयति)

ल—एनामपि भगवतीं आर्यायाः कृते विज्ञापयामि—

जातश्रमां कमलगन्धकृताधिवासैः
काले त्वमप्यनुगृहाण तरङ्गवातैः ।
देवी यदा च सवनाय विगाहते त्वां
भागीरथि, प्रशमय क्षणमम्बुवेगम् ॥ २१ ॥

ये केचिदत्र मुनयो निवसन्त्यरण्ये
विज्ञापयामि शिरसा प्रणिपत्य तेभ्यः ।
स्त्रीत्युज्झितेत्यशरणेति कुलागतेति
देवी सदा भगवतीत्यनुकम्पनीया ॥ २२ ॥

एषोऽञ्जलिर्विरचितो वनदेवतानां
विज्ञापनां क्षणमिमामवधारयन्तु ।
सुप्ता प्रमादवशगा विषमस्थिता वा
यत्नादियं भगवतीभिरवेक्षणीया ॥ २३ ॥

भो भो हिंस्रा भूमिरेषा भवद्भिः
वर्ज्या देशो न प्रवेश्यः परेषाम् ।
मृग्यो मृग्यो विप्रवासे सखीनां
यूयं सख्यो मा क्षणं मुञ्चतैनाम् ॥ २४ ॥
सख्यो नद्यः स्वामिनो लोकपाला
मातर्गङ्गे भ्रातरश्शैलराजाः ।
भूयो भूयो याचते लक्ष्मणोऽयं
यत्नाद्रक्ष्या राजपुत्री-गतोऽहम् ॥ २५ ॥

(प्रणम्य निष्क्रान्तः)

सी—कहं सच्चं एव मं एआइणीं परिच्चइअ गदो लव्वणो, (विलोक्य) हद्धी हद्धी ! अत्थमिदो सूरो, सरेण वि लव्वणो ण दीसई, हरिणा वि सअं आवासं आअन्ति, उड्डीणा पक्खिणो, संचरंति सापदा, आच्छादीअदि अंधआरेण दिट्ठी, णिमाणुसं महारण्णं, किं करेमि मंदभाआ, कीस अरण्णाहिं पव्वजामि एआइणी अदेस असळाका ति गां मि मि (?) किंणुखु मए पापं किदं, जस्स दाणिं एव विरहं सव्वहा अणुभाविदोम्हि, कहं देहावितोनळि (?) कहं दाव लव्वणणिउत्तावणदेवता.....,, कहं दे राहव-कुलक्कमागदा वसिष्ठवंमीइप्पमुहा महाप्पहावा महेसिणो ते दाणि मं परित्ता अ अभिदेहित्ति (?)। (कथं सत्यमेव मामेकाकिनीं परित्यज्य गतो लक्ष्मणः। (विलोक्य) हा धिक्, हा धिक्! अस्तमितः सूर्यः, स्वरेणापि लक्ष्मणो न दृश्यते, हरिणा अपि स्वयमावासमायान्ति, उड्डीनाः पक्षिणः, सञ्चरन्ति श्वापदाः, आच्छाद्यतेऽन्धकारेण दृष्टिः, निर्मानुषं महारण्यम्, किं करोमि मन्दभाग्या, कीदृशमरण्यैः प्रव्रजाम्येकाकिनी, ...

किंनु खलु मया कृतं पापं, यस्येदानीमेव विरहं सर्वथानुभविताऽस्मि, कथं ..... कथं तावल्लक्ष्मणनियुक्ता वनदेवता..... कथं ते राघवकुलक्रमागता वसिष्ठवाल्मीकिप्रमुखा महाप्रभावा महर्षयस्त इदानीं मां परित्यक्ता.....) (इति मोहं गच्छति)

(ततःप्रविशति वाल्मीकिः)

वा—(ससंभ्रमम्)

आकर्ण्य जह्नुतनयां समुपागतेभ्यः
सन्ध्याभिषेकविधये मुनिदारकेभ्यः ।
एकाकिनीमशरणां रुदतीमरण्ये
गर्भातुरां स्त्रियमतित्वरयागतोऽस्मि ॥ २६ ॥
तद्यावत्तामेवान्वेषयामि । (अन्वेषं नाटयति)

सी—(प्रत्यागम्य) को एस मं विज्जई । (विचिन्त्य) ण केवि, आणत्तिकरलक्खणविण्णत्तिआ अणिच्चरित्ति भअवई भाईरई तरंगाए मामणुगच्छादि । (क एष मां वीक्षते, (विचिन्त्य) न कोऽपि, आज्ञप्तिकरलक्ष्मणविज्ञप्त्या अनुचरन्ती भगवती भागीरथी तरङ्गैर्मामनुगृण्हाति)

वा—अयमन्धकारसमृद्धतया दृष्टिसञ्चारस्य न दृश्यते, अतः शब्दापयिष्ये । अयमहं भोः ।

सी—(सहर्षम्) वच्छ लक्खण पडिणिउत्तोसि ? (वत्स, लक्ष्मण, प्रतिनिवृत्तोऽसि ?)

वा—नाहं लक्ष्मणः ।

सी—(अवकुण्ठं नाटयति) अच्चाहिदं, अण्णो एसो को वा परपुरुसो, कहं दाणिं वारइस्सं महाहिदंम् (विचिन्त्य) एव्वम्—इत्थिआहं एआइणी अ । (अत्याहितम्, अन्य एष को वा परपुरुषः, कथमिदानीं वारयिष्यामि महाहितम् ? (विचिन्त्य) एवम्—स्त्री अहमेकाकिनी च)

वा—एष स्थितोऽस्मि । वत्से, तवाप्यलं परपुरुषशङ्क्या, दिवसावसान-सवनाय भागीरथीं समुपास्य प्रतिनिवृत्तेभ्यो मुनिदारकेभ्यस्त्वद्वृत्तान्तमुपलभ्य तपोधनोऽहं त्वामेवाभ्युपपत्तुमुपागतः । पृच्छामि चात्रभवतीम्—

धर्मेण जितसङ्ग्रामे रामे शासति मेदिनीम् ।
कथ्यतां कथ्यतां वत्से विपदेषा कुतस्तव ? ॥ २७ ॥

सी—तदो एव्व पुण्णचंदादो मे असणिपादो । (तत एव पूर्ण-चन्द्रान्मेऽशनिपातः)

वा—कामं रामादेव हि विपत्तिमुपागता ?

सी—अह इं । (अथ किम्)

वा—यदि त्वं वर्णाश्रमव्यवस्थाभूतेन महाराजेन निर्वासितासि तत् स्वस्ति भवत्यै, गच्छाम्यहम् । (परिक्रामति)

सी—अह विण्णवेमि–। (अथ विज्ञापयामि)

वा—कथय ।

सी—जइ रहुवरेण णिव्वासिदेत्ति भअदा णाणुकंपणीआ, एसा उण गब्भगदा रहुसअरदिलीपदसरहपहुदीणं ताइसीणं संतदित्ति दाणिं पडि-पालणीआ । (यदि रघुवरेण निर्वासितेति भवता नानुकम्पनीया, एषा पुनर्गर्भगता रघुसगरदिलीपदशरथप्रभृतीनां तादृशानां सन्ततिरिति इदानीं प्रतिपालनीया)

वा—(प्रतिनिवृत्य) कथमिक्ष्वाकुवंशमुदाहरति, तदनुयोक्ष्ये । वत्से किञ्च दशरथस्य वधूः ?

सी—जं भअवं आणवेदि । (यद्भगवानाज्ञापयति)

वा—किञ्च विदेहाधिपतेर्जनकस्य दुहिता ?

सी—अह इं । (अथ किम्)

वा—किञ्च, सीता ?

सी—णहि सीदा, भअवं मंदभाइणी । (नहि सीता, भगवन् मन्द-भागिनी)

वा—हा हतोऽस्मि मन्दभाग्यः । किंकृतेऽयमत्रभवत्याः प्रासाद-तलादधोऽवतारः ?

सी—(लज्जां नाटयति)

वा—कथं लज्जते ! भवतु, योगचक्षुषाहमवलोकयामि । (ध्यानम-भिनीय) वत्से, जनापवादभीरुणा रामेण केवलं परित्यक्ता, न तु हृदयेन । निरपराधा त्वमस्माभिरपरित्याज्यैव । एह्याश्रमपदं गच्छावः ।

सी—कोणु तुमं ? (को नु त्वम्)

वा—श्रूयताम्—

सोऽहं चिरन्तनसखा जनकस्य राज्ञ-
स्तातस्य ते दशरथस्य च बालमित्रम् ।
वाल्मीकिरस्मि विसृजान्यजनाभिशङ्कां
नान्यस्तवायमबले श्वशुरः पिता च ॥ २८ ॥

सी—भअवं वंदामि । (भगवन् वन्दे)

वा—वीरप्रसवा भव, भर्तुश्च पुनर्दर्शनमाप्नुहि ।

सी—तुमं लोअस्स वम्मीई, मम उण तादो एव्व, ता गच्छ सयं अस्स-मपअं । (गङ्गामवलोक्याञ्जलिं बध्वा) भअवइ भाईरइ, जइ अहं सोत्थिणा गब्भं अभिणिउत्तोमि तदा तव दिणे दिणे सुट्ठु उच्छाए कुंदमालाए उव-हारं करइस्सम् । (त्वं लोकस्य वाल्मीकिः, मम पुनस्तात एव; तद्गच्छ स्वमाश्रमपदम् ! (—) भगवति, भागीरथि, यद्यहं सुखेन गर्भमभिनिर्वर्त-यामि तदा तव दिने दिने सुष्ठ्वर्थितया कुन्दमालयोपहारं करोमि)

वा—अत्यन्तदुःखसञ्चारोऽयं मार्गः, विशेषतस्त्वां प्रति; तथा यथा मार्गमादेशयामि तथा तथा समागन्तव्यम् ।

एतस्मिन्कुशकण्टके लघुतरं पादौ निधत्स्वाग्रतः
शाखेयं विनता नमस्व शनकैर्गर्तो महान् वामतः ।
हस्तेनामृश तेन दक्षिणगतं स्थाणुं समं सांप्रतं
पुण्येऽस्मिन् कमलाकरे चरणयोर्निर्वर्त्यतां क्षालनम्॥२९॥

सी—(यथोक्तं परिक्रामति)

वा—(निर्दिश्य)

इक्ष्वाकूणाञ्च सर्वेषां क्रियाः पुंसवनादयः ।
अस्माभिरेव पच्यन्ते मा शुचो गर्भमात्मनः ॥ ३० ॥

कौसल्यापादशुश्रूषासौख्यं वृद्धासु लप्स्यसे ।
पश्य सख्यो भगिन्यश्च तवैता मुनिकन्यकाः ॥ ३१ ॥

(इति निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः

अथ द्वितीयोऽङ्कः

(ततः प्रविशतो द्वे मुनिकन्यके).

प्रथमा—हला, वेदवदि, दिट्ठिआ वड्ढसि, सीदाए तव पिअसहीए रामच्चामा दुवे पुत्तआ जाआ । (हला वेदवति, दिष्ट्या वर्द्धसे, सीतायास्तव प्रियसख्या रामश्यामौ द्वौ पुत्रकौ जातौ)

वेदवती—पिअं मे पिअं मे । किंणामहेआ ? (प्रियं मे प्रियं मे । किन्नामधेयौ)

प्र—जेट्ठो दाणिं भअवदा कुसोत्ति सदाविदो दुदिओ लवोत्ति ।
(ज्येष्ठ इदानीं भगवता कुश इति शब्दापितो द्वितीयो लव इति)
वे—किं समत्ता पहि परिब्भमिदुं ? (किं समर्थौ पथि परिभ्रमितुम्)
प्र—किं समत्थत्ति भणिअदि ! । (किं समर्थाविति भण्यते).

धावंति हरिणएहिं जहपडिमल्ला किसोरसीहाणं ।
तह अ तपस्सिणिहिअअं हरंति पिअदंसणा जुअला ॥ १ ॥

(धावतो हरिणकैर्यथा प्रतिमल्ला किशोरसिंहानाम् ।
तथा च तपस्विनीहृदयं हरतः प्रियदर्शनौ युगलौ)

मुणिजणस्स अंकादो अंकादो अदि संचरंति । संपदं वंमीइविरइदं रामाअणं पडंति । (मुनिजनस्याङ्कादङ्कादतिसञ्चरतः । सांप्रतं वाल्मीकि-विरचितं रामायणं पठतः)

वे—इमं उत्तंतं सुणिअ एदावत्थं सीदा किदपुण्णेत्ति तक्केमि । अहं इंहवहंति सीदासोवोअणिवत्थं आओ सिणिद्धं अंणोण्णं (?) ।
(इमं वृत्तान्तं श्रुत्वा एतदर्थं सीता कृतपुण्येति तर्कयामि .....)

प्र—संभरणीअं खु एदं । को णेमिसउत्तंतो ? (संभरणीयं खल्वेतत् । को नैमिशवृत्तान्तः)

वे—संभरिदो एव्व जण्णसंभारो महाराअस्स, णिमंतिदो सांतरवासिणीओ तपोधणाणं संपादो । (संभृत एव यज्ञसंभारो महाराजस्य, निमन्त्रितः सान्तर्वासिनीकस्तपोधनानां संपातः)

प्र—किं णिमंतिदो भअवं वंमीई ? (किं निमन्त्रितो भगवान् वाल्मीकिः)

वे—सुदं वंमीइतपोवणं वि आअदो रामदूदोत्ति । (श्रुतं वाल्मीकि तपोवनमपि आगतो रामदूत इति) कहिं दाणिं सीदा पेक्खिदव्वा ? (कुत्रेदानीं सीता प्रेक्षितव्या)

प्र—एत्थ एव्व सालपाअवच्छाआए उपविसदि कहं अदिवाहेमित्ति ।

(अत्रैव सालपादपच्छायायामुपविशति—कथमतिवाहयामीति)

(इति निष्क्रान्ते)

प्रवेशकः

(ततः प्रविशति चिन्तां नाटयन्ती भूम्यासनोपविष्टा सीता).

सी—(निःश्वस्य) अहो अविस्ससणीअदा पइदिणिट्ठुरभावाणं पुरुस हिअआणं ! जं, तंभप्पलिहिदव्वणेआणं दंपदीणं पसंगे उमामहेस्सारेत्ति सग्गे पुडवीए सीदारामोत्ति अदिप्पसिद्धिं आरोविअ णिरवराधा एदं गई अत्तंतमणुभाविदोम्हि । अथ कीस अहं अंअउत्तं णिंदामि, एव्वं पुरा अंअ-उत्तेण एअस्स वअणीअगाधाधणं सुअमेत्तएण अदरीदमण्णुत्ति संपदं अणेअजोअणांतरिदे·····सणं आकरणं मारिसि पुण्णदुक्ककारिणी जादा । तेण सह दिट्ठो चंदोदओ, तेण सह सुदो कोकिलकलप्पलाओ, तेण सह अणु-भूदो मलअमारुदप्परिसो, संपदं मए एआइणीए दिट्ठो अ सुदो अ अणुभूदो अ । पाणं परिच्चआमित्ति सव्वहा अलिअं मारिसीहिं इत्थिआहिं । पुरा अहं सामिवल्लहदाए सअलमिहिलाजणपत्थणिअं भमिअ अज्ज उण एदावत्थं शोअणीआ संवुत्तोत्ति परिच्चायदुक्कादो लज्जा एव्व मं अहिअदरं बाहेदि । संपदं उण जादा दारा संवड्ढिआ अ, सादरो दाणिं भअवं वंमीई; ण जुत्तं मम एदिणा तपोवणवासविरुद्धेण दीहणिस्सासेण कालं अदिवाहिदुं । एत्त एव्व मरणव्ववसाअस्स पडिबंधो जं मए पिअसही वेदवदी ण संदिट्ठा णवि उपणि मंतिदा अ ।

(अहो अविश्वसनीयता प्रकृतिनिष्ठुरभावानां पुरुषहृदयाणां ! यत् स्तंभप्रलिखितव्यूढस्नेहानां दम्पतीनां प्रसङ्गे उमामहेश्वराविति स्वर्गे पृथिव्यां सीतारामाविति अतिप्रसिद्धिमारोप्य निरपराधा एतां गतिमत्यन्तमनुभावि-ताऽस्मि । अथ कीदृगहमार्यपुत्रं निन्दामि । एवं पुरार्यपुत्रेण·····
·····सांप्रतमनेकयोजनान्तरिते ·····अकारणं·····

पूर्णेन्दुःसकारिणी जाता । तेन सह हृष्टश्चन्द्रोदयः तेन सह श्रुतः कोकिल-कलप्रलापः तेन सहानुभूतो मलयमारुतस्पर्शः, सांप्रतं मयैकाकिन्या हृष्टश्च श्रुतश्चानुभूतश्च । प्राणान् परित्यजामीति सर्वथा अलीकं मादृशीभिः स्त्रीभिः । पुराहं स्वामिवल्लभतया सकलमिथिलाजनप्रार्थनीया भूत्वा(?)अद्यपुनरेतदवस्थं शोचनीया संवृत्तेति परित्यागदुःखतो लज्जा एव मामधिकतरं बाधते । सांप्रतं पुनः जातौ दारौ संवर्द्धितौ च, सादर इदानीं भगवान् वाल्मीकिः । न युक्तं ममैतेन तपोवनवासविरुद्धेन दीर्घनिःश्वासेन कालमतिवाहयितुम् । एतदेव मरणव्यवसायस्य प्रतिबन्धो यन्मया प्रियसखी वेदवती न सन्दिष्टा नाप्युपनिमन्त्रिता च)

(ततः प्रविशति वेदवती).

वे—किदो एव्व तपोधणाणं वंदणुव्वआरो, अदिहिजणसमुइदो समुदाआरो अ । ता इदो एव्व सालपादपं गदुअ पिअसहिं संभावइस्सं (परिक्रम्य विलोक्य च) एसा विदेहराअतणआ णिदाहमासलआ विअ परिल्वामपांडराए अवत्थाए हिअअं अल्विपंती सालमूलमलंकरेदि । ता उवसप्पिस्सं (उपसृत्य) एसा चिंतापरवसा विअ अहोमुही लंबालआच्छाइअणआ दीणपेक्खिदा । सद्दावइस्सं सहि वैदेहि (इति शब्दापयति) (कृतएव तपोधनानां वन्दनोपचारः अतिथिजनसमुचितः समुदाचारश्च । तदित एव सालपादपं गत्वा प्रियसखीं संभावयिष्यामि । (—)एषा विदेहराजतनया निदाघमासलतेव परिक्षामपाण्डुरयावस्थया हृदयमक्षिपन्ती सालमूलमलङ्करोति । तदुपसर्पामि । (—)एषा चिन्तापरवशेवाधोमुखी लंबालकाच्छादितनयना दीनप्रेक्षिता । शब्दापयिष्यामि । सखि वैदेहि-

सी—(ससंभ्रमं विलोक्य) पिअं मे पिअं मे संपत्ता पिअसही वेदवदी साअदं पिअसहीए ? (परिष्वज्योपवेशयति)

(प्रियं मे प्रियं मे । संप्राप्ता प्रियसखी वेदवती । स्वागतं प्रियसख्याः)

वे—अवि कुसलं कुसलवाणं ? (अपि कुशलं कुशलवयोः)

सी—जह वणवासिणं (यथा वनवासिनाम्)

वे—कीदिसो तुम्हाणं वुत्तंतो ? (कीदृशो युष्माकं वृत्तान्तः)

सी—(वेणीं निर्दिश्य) कीदिसो सो (कीदृशोऽसौ)

वे—(आत्मगतम्) अदिमत्तं संतवइ एसा वराई, रामसदेरस्स संकित्तणेण विणिधारइस्सं (प्रकाशम्) अयि अपंडिदे, तह णिरपेक्खस्स णिरणुक्कोसस्स किदे कीस तुमं असिदपक्खचंदलेहा विअ दिणे दिणे परिहीअसि । (अतिमात्रं सन्तपति एषा वराकी, रामसदेरस्स (?) सङ्कीर्तनेन विनिधारयिष्यामि(—)अयि अपण्डिते, तथा निरपेक्षस्य निरनुक्रोशस्य कृते कीदृक् त्वमसितपक्षचन्द्रलेखेव दिने दिने परिहीयसे)

सी—कहं सो णिरणुक्कोसो ? (कथं स निरनुक्रोशः)

वे—जेण परिच्चत्तासि । (येन परित्यक्तासि)

सी—किमहं परिच्चत्ता ? (किमहं परित्यक्ता)

वे—(विदूस्य वेणीं परिमार्जयति) एव्वं लोओ भणादि, सच्चं परिच्चत्ता । (एवं लोको भणति सत्यं परित्यक्ता)

सी—अह सरीरेण, ण उण हिअएण (अथ शरीरेण न पुनर्हृदयेन)

वे—कहं परकेरअं हिअअं जाणासि ? (कथं परकीयं हृदयं जानासि)

सी—कहं तस्स हिअअं सीदाए परएरअं भविस्सदि ? (कथं तस्य हृदयं सीतायाः परकीयं भविष्यति)

वे—अहो अपरिच्चत्ताणुराअदा ! (अहो अपरित्यक्तानुरागता)

सी—कहं सो मम उवरि परिच्चत्ताणुराओ जेण अदिप्पसित्तो एव्व मं अधण्णं उंदिसिअ अंअउत्तेण अणुभूदो सेदुबंधादिपरिस्समो ? (कथं स

ममोपरि त्यक्तानुरागः येनातिप्रसिद्ध एव मामधन्यामुद्दिश्यार्यपुत्रेणानुभूतः सेतुबन्धादिपरिश्रमः)

वे—अत्तसिलाहिणि, खत्तिआणं समुइदो, एसो रावणस्स उवरि रोसो, ण सीदाए उवरि अणुराओ ।

(आत्मश्लाघिनि क्षत्रियाणां समुचित एष रावणस्य उपरि रोषो न सीताया उपर्यनुरागः)

सी—एदं अवरं ण पेक्खसि । (एतदपरं न प्रेक्षसे)

वे—किं एदं अवरं ? । (किमेतदपरम्)

सी—एदं । (एतत्)

वे—किं एदं ? । (किमेतत्)

सी—(सलज्जम्) जं सवत्तीजणणीसासाणुपविद्धे रामवच्छत्थले अदिचिरं संभाविदम्हि ।

(यत् सपत्नीजननिःश्वासानुपविद्धे रामवक्षःस्थले अतिचिरं संभावितास्मि)

वे—सहि माउत्तम्म समासण्णो रामस्स जण्णदिक्खवासमओ ।

(सखि मा उत्ताम्य, समासन्नो रामस्य यज्ञदीक्षासमयः)

सी—तदो किं ? । (ततः किम्)

वे—णं तहिं अस्सस्स सहधंमआरिणीए पाणिग्गहो णिव्वत्तिदव्वो ।

(ननु तत्राश्वस्य सहधर्मचारिण्या पाणिग्रहो निर्वर्तयितव्यः)

सी—अंअउत्तस्स हिअए पहवामि, ण उण हत्ते. (आर्यपुत्रस्य हृदये प्रभवामि, न पुनर्हस्ते)

वे—(आत्मगतम्) अहो से दिढाणुराअदा । (अहो अस्या दृढानुरागता) (प्रकाशम्) सहि पुत्तमुहदंसणेण वि दे पवाससोओ णावणीदो । (सखि पुत्रमुखदर्शनेनापि ते प्रवासशोको नापनीतः)

सी—सोअपडिआरेण वि सोओ वड्ढिअदि। (शोकपरिहारेणापि शोको वर्द्धते)

वे—कहं विअ। (कथमिव)

सी—जह जहा दे दारआ ईससमुंभिण्णदसणंकुरकोमलेण वदणेण मम-मुहं आलोअंता पहसंति, अच्चंतकोमलेण आलावेण तादिसं सद्दावेअंति, तह जाणामि तस्स मुंदे णिमज्जामित्ति। संपदं उण कालवसेण परिणदा परिच्चत्तबालभावा अबाला संवुत्तोत्ति मं अहिअतरं बाधेयदि। (यथा यथा द्वौ दारकावीषत्समुद्भिन्नदशनाङ्कुरकोमलेन वदनेन मम मुखमालोकयन्तौ प्रहसतः, अत्यन्तकोमलेनालापेन तादृशं शब्दापयतः, तथा जानामि तस्य मौग्ध्ये निमज्जामीति। सांप्रतं पुनः कालवशेन परिणतौ परित्यक्त-बालभावावबालौ संवृत्ताविति मामधिकतरं बाधते)

वे—अहो किंति तस्स महग्घं णिसंसत्तणं जं सीदा णाम बालतण आ ईरिसं अवत्थं अणुभवदित्ति।

(अहो किमिति तस्य महार्घं नृशंसत्वं यत्सीता नाम बालतनयेदृशीम-वस्थामनुभवतीति)

सी—सहि वेदवदि अवि णाम—(सखि वेदवति अपि नाम)

वे—कीस लज्जिदेण? भणाहि अंअउत्तं पेक्खामित्ति। (किं लज्जि-तेन, भण आर्यपुत्रं प्रेक्ष इति)

सी—किं लज्जावेसेण, एव्वं भणामि। (प्रकाशम्) अवि कुसलवाणं तादस्स दंसणेण जम्मं अमोहं भवेदित्ति। (किं लज्जावेशेन, एवं भणामि) (—) अपि कुशलवयोस्तातस्य दर्शनेन जन्मामोघं भवेदिति)

वे—णं समासण्णं एव्व तुम्हाणं राअदंसणं। (ननु समासन्नमेव युष्माकं राजदर्शनम्)

सी—कहं विअ? (कथमिव)

(नेपथ्ये ऋषिः)

भो भो आश्रमवासिनो जनाः शृण्वन्तु भवन्तः—

इतो नातिदूरे महाक्रतुरश्वमेधः प्रवर्तते, संभृतानि यज्ञोपकरणानि, सन्निपतिताश्च नानादेशाश्रमवासिनो वसिष्ठात्रेयप्रभृतयो महामुनयः । केवलं भगवतो वाल्मीकेरागमनमुदीक्षमाणो नाद्यापि यज्ञदीक्षां प्रविशति महाराजः । आगतश्च वाल्मीकितपोवनवासिनामुपनिमन्त्रणार्थं रामदूतः । तस्मान्नैव परिलम्बितव्यम् ।

तीर्थोदकानि समिधः (परिपूर्णरूपा)
दर्भाङ्कुरानविहतान् परिगृह्य सद्यः ।
अग्रे भवन्तु मुनयो मुनिकन्यकाश्च
कुर्वन्तु मङ्गलबलीनुटजाङ्गणेषु ॥ २ ॥

सी—तुवरेमि, तुवरेमि, एस अंअ कस्सवो पत्ताणघोसणासमणन्तरं गहिदजण्णोवकरणो अग्गदो पत्थिदो। अहं वि कुसलवाणं पत्थाणमङ्गलं अणुचिट्ठिस्सं । (त्वरामि, त्वरामि, एष आर्य काश्यपः प्रस्थानघोषणासमनन्तरं गृहीतयज्ञोपकरणोऽग्रतः प्रस्थितः । अहमपि कुशलवयोः प्रस्थानमङ्गलमनुष्ठास्यामि)

(इति निष्क्रान्ताः सर्वे)

द्वितीयोऽङ्कः

तृतीयोऽङ्कः

(ततः प्रविशति मार्गपरिश्रान्तो गृहीतभारस्तापसः)

ता—(श्रममभिनीय) भो सुट्ठु परिस्संतोम्हि एदिणा संदापदीहेण गिम्मसमएण। ण पहवामि परिस्समगआणं जंघाणं विक्केवणिक्केवं कादुं । पाददळं अ मे संपक्कं पिअअसंपोडएहिं संवुत्तं । अण्णच्च, तह सुउमाळा देवी सीदा तह कोमळा अ कुसळवा तापससद्धेण सह अणत्थमिदे सूरे नेमिशं पत्ता। अहं अज्ज वि णासादेमि अडविदिसामुहे (विचिन्त्य) को

दाणिं मे णेमिसमग्गं आचक्खिस्सदि (विलोक्य) णूणं एसो लक्खणसहाओ रामो णेमिसं संपत्तो । ता अहं वि दाणं गइं अणुसरेमि । (निष्क्रान्तः)

(भोः सुष्ठु परिश्रान्तोऽस्मि एतेन सन्तापदीर्घेण ग्रीष्मसमयेन । न प्रभवामि परिश्रमगतयोर्जंघयोर्विक्षेपनिक्षेपौ कर्तुम् । पादतलं च मे संपक्वं पिटकसंस्फोटकैः संवृत्तम् । अन्यच्च, तथा सुकुमारा देवी सीता तथा कोमलौ च कुशलवौ तापससार्द्धेन सहानस्तमिते सूर्ये नैमिशं प्राप्ताः । अहमद्यापि नासादयामि अटवीदिशामुखे (—) क इदानीं मे नैमिशमार्गमाचक्षीत (—) नूनमेष लक्ष्मणसहायो रामो नैमिशं संप्राप्तः । तदहमपि तयोः गतिमनुसरामि)

प्रवेशकः

(ततः प्रविशति शोकसन्तप्तो रामो लक्ष्मणश्चाग्रतः)

ल—आर्य इत इतः । (परिक्रम्य)

प्रथममनपराधां तां समुत्कृष्य देवी-
मगममहमगाधे कानने त्यक्तुकामः ।
पुनरपि कुलशेषं राममादाय देवं
स्वजनविपदि दक्षः काप्यधन्यः प्रयामि ॥ १ ॥

हा ! सुष्ठु खल्विदमुच्यते—

प्रमादः संपदं हन्ति प्रश्रयं हन्ति विस्मयः ।
व्यसनं हन्ति विनयं हन्ति शोकश्च धीरताम् ॥ २ ॥ इति

तथाहि—एष मन्दरमहीधरसमानधैर्यो भगवतो वाल्मीकेरागमन-मुपलभ्य तद्दर्शनार्थं गोमतीतीराश्रमपदमुच्चलितः । संप्रति तामेव दिशं परित्यज्य शोकावेगसमाक्षिप्तहृदयो महावनाभिमुखं प्रस्थितः । ततः किमेनं सम्यक् ज्ञापयामि ? अथवा तत्किमनेन प्रतिहारेण धावितं मार्गमादेशयामि, यथायमचेतयमेव वाल्मीकेराश्रममनुप्राप्नोति । इत इत आर्यः ।

रा—(निश्चस्य)

नीतस्तावन्मकरवसतौ वन्ध्यतां शैलसेतुः
देवो वह्निर्न च विगणितः शुद्धिसाक्ष्ये नियुक्तः ।
इक्ष्वाकूणां भुवनमहिता सन्ततिर्नेक्षिता मे
किं किं मोहादहमकरवं मैथिलीं तां निरस्य ॥ ३ ॥

(परिक्रम्य)

भो भोः ! कष्टम् ! अतिनिरालंबस्तपस्विन्याः प्रवासः ।

पातयति सा क्व दृष्टिं कस्मिन्नासाद्य चित्तमाश्वसिति ।
जीवति कथं निराशा श्वापदभवने वने सीता ॥ ४ ॥

ल—(आत्मगतम्) आर्याया विप्रवासं तनयवैशुसञ्च समनुचिन्त्य भृशमयं सन्तप्यते, ततः प्रस्तावान्तरेण देवीवृत्तान्तमपसारयामि । (प्रकाशम्) इतस्तावदवलोकयत्वार्यः—

मरकतहरितानामम्भसामेकयोनि-
र्मदकलकलहंसीगीतरम्योपकण्ठा ।
नलिनवनविकासैर्वासयन्ती दिगन्ता-
न्भरवर पुरतस्ते दृश्यते गोमतीयम् ॥ ५ ॥

रा—(स्पर्शमभिनीय)

मुक्ताहारा मलयमरुतश्चन्दनं चन्द्रपादाः
सीतात्यागात्प्रभृति नितरां तापमेवावहन्ति ।
अद्याकस्माद्रमयति मनो गोमतीतीरवायु-
र्नूनं तस्यां दिशि निवसति शोषिता सा बराकी ॥ ६ ॥

ल—अतिविषमोऽयं निम्नगावतारः, तदप्रमत्तमवतीर्यताम् ।

(उभाववतरणमभिनीय) (निर्वर्ण्य)

यथैतान्यविरलपदन्यासलाञ्छितानि सैकतानि वृन्तमात्रावशेषतया संसूच्यमानकुसुमापचया रोधोलताः तदालूनकिसलयतया विरलच्छाया वनस्पतयः, तथा जानामि प्रत्यासन्नवर्तिना मनुष्याधिवासेन भवितव्यम्। तथाहि—

अभिनवरचितानि देवतानां
जलकुसुमैर्बलिमन्ति सैकतानि ।
इयमपि कुरुते तरङ्गमध्ये
भुजगवधूललितानि कुन्दमाला ॥ ७ ॥

रा—न केवलं प्रत्यासन्नवर्तिना प्रतिस्रोतोपगतेनापि मनुष्याधिवासेन भवितव्यम् ।

ल—आश्चर्यमाश्चर्यम् ! एषा हि कुन्दमाला चरणसपर्यामिव कर्तुकामया समुद्रगामिन्या तरङ्गपरम्परया क्रमेण देवस्य पादान्तिकमुपहृता । अवहितं प्रेक्षणीया विरचना, तदवलोकयत्वार्यः । (गृहीत्वोपनयति)

रा—(निर्वर्ण्य रोमाञ्चमभिनीय) वत्स, दृष्टपूर्वमिदं कुसुमरचनाविन्यासकौशलम् ।

ल—क्व दृष्टम् ?

रा—क्व वान्यत्रेदृशस्यावस्थानम् ?

ल—किं देव्याम् ?

रा—अथ किम् ।

ल—को जानाति दुर्विदग्धः प्रजापतिः कथं कथं क्रीडतीति । गच्छत्वार्यः इदमेव गोमतीतीरं प्रतिस्रोतोऽनुसरावो यावदस्याः कुन्दमालायाः प्रभवमासादयावः ।

रा—सुलभसादृश्यो लोकसन्निवेशः । न चैतावदस्माकं भागधेयम् । इतश्चात्यन्तविप्रकृष्टे देशे परित्यक्तायाः सीताया आगमनं न संभाव्यते । तथाप्यादेशय मार्गं येनेदं सलिलान्तरमुज्झन्तौ वसतिमासादयावः ।

ल—एषा नदीभूमिः कण्टकितशर्करा शुक्तिपुटदुःखसञ्चारा, तथथा यथा मार्गमादेशयामि तथा तथा शनैरागन्तव्यमार्येण ।

रा—एवं क्रियताम् । यद्यपीयमभिमता कुन्दमाला तथापि देवतोपहारशङ्कया नोपभोगमुपनीयते । (इति विमुञ्चति)

ल—एतां वेत्रलतां विलंघय पदं मास्मिन् कृथाः शुक्तयो
मूर्द्धानं व्यवधाय नामय पुरो दूरावनम्रस्तरुः ।
चापाग्रेण विकृष्य मुञ्च पुरतः शाखां तिरश्चीमिमा-
मुत्त्रस्यन्ति पुरा शरारुदयिता धीरं परिक्रम्यताम् ॥ ८ ॥

रा—(यथोक्तं परिक्रम्य) वत्स किमेतस्मिन् देशे भगवतो वाल्मीकेराश्रमसन्निवेशः ?

ल—किं हृष्टमार्येण ?

रा—असौ तनुत्वादवधानदृश्या
दिशः समाक्रामति धूमलेखा ।
आकृष्यमाणो मृदुनानिलेन
श्रोत्रेषु संमूर्च्छति सामनादः ॥ ९ ॥

ल—सम्यगुपलक्षितमार्येण । अहमप्यग्रतो गत्वा निरूपयामि । (परिक्रामंस्तरुस्तंभमभिनीय) कथमेतस्मिन् पदोद्धारे ससाध्वसमिव मे हृदयम्, स्तंभितावूरू, उत्क्षिप्यमाणौ चरणौ नाग्रतो भूमिं गन्तुमुत्सहेते । तत्किमिदम् ! (विचिन्त्य) सुव्यक्तं गुरुजनसमाक्रान्तेन प्रदेशेन भवितव्यम् । अथ पदानीव लक्ष्यन्ते । (भूमिं निर्वर्णयति)

रा—किं कृतोऽयं वत्सस्य भूमिनिरूपणायामादरः ?

ल—एतानि नितान्तमनोहरतया सङ्क्रान्तचरणतलसौकुमार्याणि ललितनिभृतविन्यासतया विज्ञायमानस्त्रीपदभावानि पुलिनतलसन्निवेशपदानि दृश्यन्ते । पश्यत्वार्यः—

विलासयोगेन परिश्रमेण वा
स्वभावतो वा निभृतानि मन्थरम् ।
पदानि कस्याश्चिदिमानि सैकते
प्रयान्ति तुल्यं कलहंसविभ्रमैः ॥ १० ॥

रा—(निर्वर्ण्य सहर्षम्) वत्स, किमुच्यते कस्याश्चिदिति । ननु वक्तव्यम्—सीतायाः पदानि—इति । पश्य—

समानं संस्थानं निभृतललिता सैव रचना
तदेवैतद्रेखाकमलरचितं चारु तिलकम् ।
यथा चेयं दृष्टा हरति हृदयं शोकविधुरं
तथाप्यस्मिन्देव्या सपदि पदपङ्क्तिर्विनिहिता ॥ ११ ॥

ल—(सहर्षम्) यावदेतामेव पदपङ्क्तिमनुसरन्तौ वाल्मीकेराश्रमपद-मनुसरावः । यथा चेयं प्रत्यग्रनिहिता पदपङ्क्तिस्तथा जानामि प्रत्यासन्नवर्तिन्या देव्या भवितव्यमिति ।

(ततः प्रविशति सीता)

सी—णिव्वत्तिदं सवणं, उवासिदा संझा, हुदो हुदवहो, ओगाहिदा भगवई भाईरही, भगवई भाईरहीं उद्दिसिअ महपदिण्णा सहत्थगद्धा कुन्द-माला समप्पिदा । दाणिं अहं उण्णदगंभीरसीदलं लदाजालं पविसिअ अदिहिजणोपत्थाणजोग्गाइं कुसुमाइं ओचिणोमि। (प्रविष्टकेनापचयं नाटयति)

(निर्वर्तितं सवनम्, उपसिता सन्ध्या, हुतो हुतवहः, अवगाहिता भगवती भागीरथी, भगवतीं भागीरथीमुद्दिश्य.....स्वहस्तग्रथिता कुन्दमाला समर्पिता। इदानीमहमुन्नतगंभीरशीतलं लताजालं प्रविश्य अतिथिजनोपस्थानयोग्यानि कुसुमान्यवचिनोमि)

ल—एषा पदपङ्क्तिः क्रमेण मार्गवशात् पुलिनतलं परित्यज्य स्थल-मारूढा, प्रणष्टा च । तदिदमेव पुरस्तात्संदृश्यमानलतागुल्मप्रच्छायमतिरमणीयमध्यास्य गतश्रमौ भगवन्तं प्राचेतसमुपसर्पावः ।

रा—यदभिरुचितं भवते । (परिक्रम्योपविशतः)

रा—(निःश्वस्य सबाष्पम्) वत्स वत्स—

सी—(कर्णं दत्वा) को णु खु एसो सअळजळहरद्धणिदगंभीरेण सरविसेसेण अच्चन्तदुःखबाअणं वि मे सरीरं रोमांचेदि । णिरूवेमि दाव को एसोत्ति; अहवा ण जुत्तं मम अजाणिअ परमत्थं अत्थाणे दिट्ठिं विसज्जइदुं । किं एत्थ जाणिदव्वं, णावणाहयदि मे सरीरं परपुरुससद्दो रोमंचग्गहणेण; सुव्वत्तं सो एत्थ णिरणुक्कोसो संपत्तो । त णिअवण्णइस्सं । अहवा तह परंमुहे जणे एव्वं अहिमुही होमित्ति जं सच्चं अत्तणोवि अहं लज्जिदम्हि । ता ण पेक्खिस्सं । (पराङ्मुखी भूत्वा) कहं ण प्पहवामि अत्ताणअस्स, आवंजिअदि मे बळक्कारेण तहिं एव्व दिठी । किं अवरं करेमि अत्ताणअस्स राअपराहीणदाए णिओओ (निर्वर्णयति) अंहो दिठोत्ति परिदोसो, चिरप्पवासोत्ति मंणू, परिरुवामोत्ति उव्वेओ, णिरणुक्कोसोत्ति अहिमाणो, चिरपरिचिदोत्ति अणुराओ, दस्सणीओत्ति उक्कण्ठा, सामित्ति बहुमाणो, कुसलवाणं तादोत्ति कुडुंबिणीसब्भावो, अवराहं पविसिदंहित्ति ळज्जा; ण जाणामि अंअउत्तदंसणेण कीदिसं अवत्थं अणुभवामित्ति ।

(को नु खल्वेष सजलजलधरस्तनितगंभीरेण स्वरविशेषेणात्यन्तदुःखभाजनमपि मे शरीरं रोमाञ्चयति । निरूपयामि तावत् क एष इति । अथवा न युक्तं ममाज्ञात्वा परमार्थमस्थाने दृष्टिं विसर्जयितुम् । किमत्र ज्ञातव्यम् ? नावनाहयति मे शरीरं परपुरुषशब्दो रोमाञ्चग्रहणेन । सुव्यक्तं सोऽत्र निरनुक्रोशः संप्राप्तः । तन्निर्वर्णयामि । अथवा तथा पराङ्मुखे जने एवमभिमुखीभवामीति यत्सत्यमात्मनोऽपि अहं लज्जितास्मि । तन्न प्रेक्षिष्ये ।

(पराङ्मुखी भूत्वा) कथं न प्रभवाम्यात्मनः, आवर्ज्यते मे बलात्कारेण तत्रैव दृष्टिः । किमपरं करोमि आत्मनो राजपराधीनताया नियोगः । (निर्वर्णयति) अंहो दृष्ट इति परितोषः, चिरप्रवास इति मन्युः, परिक्षाम इत्युद्वेगः, निरनुक्रोश इत्यभिमानः, चिरपरिचित इत्यनुरागः, दर्शनीय इत्युत्कण्ठा, स्वामीति बहुमानः, कुशलवयोस्तात इति कुटुंबिनीसद्भावः, अपराधं प्रवेशितास्मीति लज्जा; न जानामि आर्यपुत्रदर्शनेन कीदृशीमवस्थामनुभवामीति)

ल—किमर्थमार्यो मामकस्मादेवामन्त्र्य बाष्पायमाणनयनस्तूष्णीमधोमुखः संवृत्तः ।

रा—निःसंपातविविक्तमिदमरण्यं तटरुहतरुच्छायासमाकीर्णरमणीयसैकतां प्रसन्नसलिलवाहिनीं समुद्रगामिनीञ्चावलोकयन् संस्मृत्य दण्डकावनवासमेवं वैक्लव्यमनुप्राप्तोऽस्मि ।

सी—अंअउत्त सुमरसि वणवासं, ण उण वणवासिणं जणं ।

(आर्यपुत्र स्मरसि वनवासं, न पुनर्वनवासिनं जनम्)

ल—किं त्वत्र दुःखैकवासे वनवासे स्मर्तव्यमिति ।

रा—वत्स लक्ष्मण, किमेवं ब्रवीषि—दुःखैकवासे वनवासे स्मर्तव्यमिति । पश्य पश्य —

किसलयसुकुमारं पाणिमालम्ब्य देव्या
विविधरतिसखीभिः सङ्कथाभिर्दिनान्ते ।
चरणगमनवेगान्मन्थरस्य स्मरामि
सुतपयसि तटिन्याः सैकते चङ्क्रमस्य ॥ १२ ॥

सी—अइ णिरनुक्कोस, किं एदिणा संळावट्ठाणेण असरणं दुःखिदं जणं अहिअदरं बाधेसि । (अयि निरनुक्रोश किमेतेन संलापस्थानेन अशरणं दुःखितं जनमधिकतरं बाधसे)

ल—आर्य, अलं शोकेन ।

रा—कथं न शोचामि मन्दभाग्यः ? पश्य पश्य—

पूर्वं वनप्रवासः पश्चाल्लङ्का ततः प्रवासोऽयम् ।
आसाद्य मामधन्यं दुःखाद्दुःखं गता सीता ॥ १३ ॥

सी—अंअउत्त, णिव्वासिदाए असदिसं । (आर्यपुत्र, निर्वासिताया असदृशम्)

रा—हा ! जनकराजपुत्रि ।

सी—अप्पपुण्णभाइणीए वज्जणीअ ?। (अल्पपुण्यभागिन्या वर्जनीय ?)

रा—हा ! वनवाससहायिनि ।

सी—अ वि एदं ण संपदं । (अप्येतन्न सांप्रतम् !)

रा—हा ! क्व गतासि ।

सी—जहिं मंदभाआ गच्छदि । (यत्र मन्दभाग्या गच्छति)

रा—देहि मे प्रतिवचनम् ।

सी—असंभावणीए जणे कीदिसं पडिवअणं । (असंभावनीये जने कीदृशं प्रतिवचनम्)

रा—(शोकं नाटयति)

ल—आर्य, ननु विज्ञापयामि—अलं शोकेनेति ।

रा—कथं न शोचामि शोचनीयां वैदेहीम् ? ।

सी—अंअउत्त मा एव्वं भण—सोअणीआ वैदेहित्ति । ण खु सो जणो सोअणिज्जो जो एव्वं वल्लहेण सोईअदि । (आर्यपुत्र मैवं भण—शोचनीया वैदेहीति । न खलु स जनः शोचनीयः, य एवं वल्लभेन शोच्यते)

रा—वत्स लक्ष्मण किं शक्यते ज्ञातुं क्व वर्तत इति ?

सी—दिअसावसाणविणिवारिदपिअसमाअमा विअ चक्कवाई इदो एव्व पवासे वट्टामित्ति ।

(दिवसावसानविनिवारितसमागमेव चक्रवाकी इहैव प्रवास एव वर्तत इति)

ल—न शक्यते क वर्तत इति ज्ञातुम् ।

रा—उत्सादितं मया चिरकालाविच्छिन्नं रघुकुलम् । (इति रोदिति)

सी—(सशोकम्) अदिमत्तं संतवदि अंअउत्तो, किं करेमि । साहसादो त्तिमिददंसणं पमज्जामि अस्सुचअं । (पदमुत्क्षिप्य) अहवा जणप्पवादो रक्खिदव्वो । अंअउत्तेण जाव न पेक्खामि दाव सोआवेअबळक्कारिदा ण प्पहवामि अप्पाणअस्स । मुणिजणसंपादसमुइदो एसो उद्देसो । अदो जइच्छागदो को वि मं पेक्खिस्सदि । ता एदिणा ळदाजाळपच्छण्णसुहसंचारेण मग्गेण अस्समं गदुअ कुसळवा संभावइस्सं ।

(नाट्येनावलोकयन्ती निष्क्रान्ता)

(अतिमात्रं सन्तपत्यार्यपुत्रः, किं करोमि । साहसतः स्तिमितदर्शनं प्रमार्जयाम्यश्रुसञ्चयम् । (पदमुत्क्षिप्य) अथवा जनप्रवादो रक्षितव्यः । आर्यपुत्रेण यावन्न प्रेक्ष्ये तावच्छोकावेगबलात्कारिता न प्रभवाम्यात्मनः । मुनिजनसंपातसमुचितोऽयमुद्देशः, अतो यदृच्छागतः कोऽपि मां प्रेक्षिष्यते, तदेतेन लताजालप्रच्छन्नसुखसञ्चारेण मार्गेणाश्रमं गत्वा कुशलवौ संभावयामि)

(ततःप्रविशति ऋषिः)

ऋ—आदिष्टोऽस्मि भगवता वाल्मीकिना—वत्स, बादरायण, श्रुतं मया लक्ष्मणसहायो रामभद्रस्तपोवनमिदमनुप्राप्त इति । स कदाचिन्माध्याह्निककार्यसंपादनव्यग्रानस्मान्मन्यमानो बहिरवस्थितो भवेत् । तस्मात्त्वमेनमुपक्रम्य परिसमाप्तमाध्याह्निककार्यं दर्शनमाकांक्षमाणं मामावेदय—इति । तथावदहमपि भगवतो वाल्मीकेरादेशाद्रामभद्रमेवान्वेषयामि ।

(परिक्रामति)

ल—(विलोक्य ससंभ्रमम्) आर्य तपोधनोऽयमित एवाभिवर्तते ।

रा—(अश्रूणि प्रमृज्य कृतधैर्यः स्थितः)

ऋ—(निर्वर्ण्य) अये, लतागुल्मप्रच्छायेऽस्मिन् पुरुषयुगलमिव । अपि नाम लक्ष्मणसहायो रामो भवेत् । (विचिन्त्य) कस्तत्र सन्देहः—

मन्दं वाति समीरणो न परुषा भासो निदाघार्चिषो
न त्रस्यन्ति चरन्त्यशङ्कमधुना मृग्योऽपि सिंहैः सह ।
मध्याह्नेऽपि न याति गुल्मनिकटं च्छाया तदध्यासिता
व्यक्तं सोऽयमुपागतो वनमिदं रामाभिधानो हरिः ॥ १४ ॥

न केवलमतिक्रान्तमानुषेण प्रभावेण, आकारेणापि शक्यत एव निश्चेतुम् । (निर्वर्ण्य)

व्यायामकठिनः पांशुः कर्णान्तायतलोचनः ।
व्यूढोरस्को महाबाहुर्यक्तं दशरथात्मजः ॥ १५ ॥

तदेनमुपगम्य यथावस्थितमावेदयामि । (उपागम्य) राजन्, स्वस्ति ।

रा—अभिवादये ।

ऋ—विजयी भव ।

रा—किमागमनप्रयोजनमार्यस्य ?

ऋ—परिसमाप्तसकलकर्मा भगवान् वाल्मीकिर्महाराजस्यागमनमुद्वीक्षमाणस्तिष्ठति ।

रा—(विलोक्य) अये ! अतिक्रान्तो मध्याह्नः । तथाहि—

प्रविश्य तरुमूलानि नीत्वा मध्यन्दिनातपम् ।
अध्वनीना इव च्छाया निर्गच्छन्ति शनैः शनैः ॥ १६ ॥

अपि च,

मध्याह्नार्कमयूखतापमधिकं तोयावगाहादयं
नीत्वा वारिकणार्द्रकर्णपवनैराह्वाद्यमाननः ।
मन्दं मन्दमुपैति कूलमधुना वक्षःप्रणुन्नैर्जलै-
राक्रान्तं करघातझाङ्कृतिसरित्कल्लोलचक्रः करी ॥ १७ ॥

(इति निष्क्रान्ताः सर्वे)

तृतीयोऽङ्कः

चतुर्थोऽङ्कः

(ततः प्रविशति तापसीद्वयम्)

प्रथमा—हळा, जण्णवेदि, रामायणसङ्गीतअणिमित्तं वंमीइतपोवणं संपत्ताए तिळुत्तमाए अहं एव्वं भणिदा—अहं पहावर्णिमिदेण सीदारूवेण रामस्स दंसणपहं ओअरिअ रामो सीदाए उवरि साणुकंपो ण वेत्ति जाणिदुं णु इच्छामि, ता तुमं रामं अण्णेसहि—त्ति । ता दंसेदु पियसही रामस्स विस्समत्थाणं । (हला, यज्ञवेदि, रामायणसङ्गीतकनिमित्तं वाल्मीकितपोवनं संप्राप्तया तिलोत्तमयाहमेवं भणिता—अहं प्रभावनिर्मितेन सीतारूपेण रामस्य दर्शनपथमवतीर्य रामः सीताया उपरि सानुकम्पो न वेति ज्ञातुं नु इच्छामि, तत्त्वं राममन्वेषय—इति । तद्दर्शयतु प्रियसखी रामस्य विश्रमस्थानम्)

यज्ञवेदिः—हळा, वेदवदि, तिळुत्तमाए जदा एसो आळावो पवुत्तो तदा आसण्णगुम्मलदागहणपच्छण्णट्ठिदेण रामवयस्सेण अंअहासिएण सव्वं आअण्णिदं । (हला, वेदवति, तिलोत्तमया यदैष आलापः प्रवृत्तस्तदासन्नगुल्मलतागहनप्रच्छन्नस्थितेन रामवयस्येनार्यहसितेन सर्वमाकर्णितम्)

वेदवती—अच्छाइदं खु आअरिदं, जइ गहिदसंकेअस्स तस्स अग्गदो तिळुत्तमा सीदाए चरिदाइं अणुवट्टिस्सदित्ति तदो विपरीदो उवहासो भवे, ता इमादो पिअसहिं तिळुत्तमं णिवारेमि ।

(अत्याहितं खलु आचरितम्, यदि गृहीतसङ्केतस्य तस्याग्रतस्तिलोत्तमा सीतायाश्चरितानि अनुवर्तिष्यत इति ततो विपरीत उपहासो भवेत् । तदस्मात्प्रियसखीं तिलोत्तमां निवारयामि)

य—सहि, वेदवदि, सीदा दाणिं कहिं? (सखि वेदवति सीतेदानीं कुत्र?)

वे—सुणाहि अज्ज सत्तमे दिवहे संपादिदाहि तपोवणवासिणीहि विण्णविदो भअवं वंमीई—एसा णूणं अस्समदीहिआ पदुमापचयादिसु अत्तणो उपभोएसु दाणिं महाराअस्स सण्णिहाणेण परपुरुसणअणपरिक्खित्ता ण सक्का इत्थिआजणेण ओगाहिदुंति । तदा भअवदा वंमीइणा णिज्झाणणिच्चळणअणेण मुहुत्तं णिज्झाइअ भणिदं—एदस्सिं दीहिआए वट्टमाणो इत्थिंआजणो पुरुसणअणाणं अगोअरो भविस्सदित्ति । ततप्पउदि सीदा रामस्स दंसणपहं परिहरन्ती दीहिआतीरे सअलं दिवअं अदिवाहेदि ।(शृणु, अद्य सप्तमे दिवसे संपातिताभिस्तपोवनवासिनीभिर्विज्ञापितो भगवान् वाल्मीकिः-"एषा नूनमाश्रमदीर्घिका पद्मापचयादिषु आत्मन उपभोगेषु इदानीं महाराजस्य सन्निधानेन परपुरुषनयनपरिक्षिप्ता न शक्या स्त्रीजनेनावगाहितुम्" इति । तदा भगवता वाल्मीकिना निध्याननिश्चलनयनेन मुहूर्तं निध्याय भणितम्—एतस्यां दीर्घिकायां वर्तमानः स्त्रीजनः पुरुषनयनानामगोचरो भविष्यति—इति । ततः प्रभृति सीता रामस्य दर्शनपथं परिहरन्ती दीर्घिकातीरे सकलं दिवसमतिवाहयति)

य—किं जाणन्ति कुसलवा रामस्स अत्तणो अ संबन्धम् ! (किं जानीतः कुशलवौ रामस्यात्मनश्च संबन्धम् ?)

वे—अत्तणो बालभावेण मुणिजणस्स अ संसग्गेण मादरं वि णामदो ण जाणन्ति, किं उण दीहप्पवासविच्छिण्णं रामस्स उत्तन्तम् । (आत्मनो बालभावेन मुनिजनस्य च संसर्गेण मातरमपि नामतो न जानीतः, किंमुत दीर्घप्रवासविच्छिन्नं रामस्य वृत्तान्तम्)

य—किं जाणासि रामो एत्थ तपोवणं पविसदित्ति । (किं जानासि रामः अत्र तपोवनं प्रविशादिति)

वे—कुदो तस्स आअमो ? (कुतस्तस्यागमः ?)

य—गच्छ तुमं तिळुत्तमाए सआसं, अहं अ सीदाए पस्सपरिवट्टिणी होमि । (गच्छ त्वं तिलोत्तमासकाशम्, अहं च सीतायाः पार्श्वपरिवर्तिनी भवामि) (इति निष्क्रान्ते)

(प्रवेशकः)

(ततः प्रविशत्युत्तरीयकृतप्रावरणा सीता यज्ञवती च)

य—सहि, वैदेहि, केण तुह उवदिट्ठं अपुव्वं उत्तरीअजुअळधारणं ?

(सखि, वैदेहि, केन तवोपदिष्टमपूर्वमुत्तरीययुगलधारणम् ?)

सी—अच्चन्तसीअळेण तरङ्गवाहिणा दीहेण दीहिआमारुदेण ।

(अत्यन्तशीतलेन तरङ्गवाहिना दीर्घेण दीर्घिकामारुतेन)

य—सहि, पवासविरुद्धं खु एदं सारदचंदकिरणरासिपरिपंडुरं सुरहिबहुळामोदसमारद्धमहुअरउळसंगीदमणुहरं एदं पावरणं ।

(सखि, प्रवासविरुद्धं खल्वेतच्छारदचन्द्रकिरणराशिपरिपाण्डुरं सुरभिबहुलामोदसमारब्धमधुकरकुलसङ्गीतमनोहरमेतत्प्रावरणम्)

सी—सहि, जदा अहं महाराअसासणेण वणप्पवासे परिच्चत्ता चित्तऊटं परिच्चइअ दक्खिणपहं पत्थिदा तदा चिरणिवाससमुप्पण्णसहिसिणेहाए चिन्ताउळाए वणदेवदाए मायावईए सुमरणणिमित्तं चंदधवळं वासिदसुअंधं अत्तणो दिव्वं उत्तरीअअं मम पणीदं। तं अंअउत्तस्स मम वि हत्थे अच्चन्तसहीभूदं चिरदुःखसहायंत्ति एत्थ अत्ताइं साअरं धारिदं। (इति रोदिति)

(सखि, यदाहं महाराजशासनेन वनप्रवासे परित्यक्ता चित्रकूटं परित्यज्य दाक्षिणापथं प्रस्थिता तदा चिरनिवाससमुत्पन्नसखीस्नेहया चिन्ताकुलया वनदेवतया मायावत्या स्मरणनिमित्तं चन्द्रधवलं वासितसुगन्धमात्मनो दिव्यमुत्तरीयकं मम प्रणीतम्। तदार्यपुत्रस्य ममापि हस्तेऽत्यन्तसखीभूतं चिरदुःखसहायमिति अत्रात्मना सादरं धारितम्)

य—सहि मा रोदी, णहि एसो तपोवणवासो वणवासोत्ति पुच्चिअदि।

(सखि मा रोदीः, न ह्येष तपोवनवासो वनवास इति प्रोच्यते)

सी—कहं ण रोइस्सं, कहं एदं तपोवणं आअदो अंअउत्तोत्ति दिउण विद्धारं आस सअणं पत्थरेमि। एआइणी दीहणीसासेहिं रत्तिंदिवं अदिवाहेमि। ता बलियं खु आवेअकारणं।

(कथं न रोदिष्यामि ? कथमेतत्तपोवनमागत आर्यपुत्र इति द्विगुण····
·····धारयामि। एकाकिनी दीर्घनिःश्वासैरात्रिन्दिवमतिवाहयामि। तद्बलवत् खलु आवेगकारणम्)

य—आलक्खणीआइ एदाणि कदणाणि। तुमं एतस्सिं दीहिआतीरविहंगमामिहुणविभमं अवलोअअन्ती अत्ताणं विणोदेहि। अहं वि अत्तणो णिओअं अणुचिट्ठामि। (परिक्रामति)

(आलक्षणीयानि एतानि कदनानि। त्वमेतस्मिन् दीर्घिकातीरे विहंगममिथुनविभ्रममवलोकयन्ती आत्मानं विनोदय, अहमपि आत्मनो नियोगमनुतिष्ठामि)

सी—(दीर्घिकामालोक्य) अइधण्णं खु एदं राअहंसमिहुणं एवं अणासादिअ विरहं समाअमसुहं अणुहोदित्ति णद्धि दंपईणं मम विरहसमो उपदेसणिउणो उपज्झायो, जेण पण्हिणो वि अण्णोण्णहिअअग्गहणसमत्थललिअमहुरा चाडुप्पओअं पत्थावयन्ति ।

(अतिधन्यं खल्वेतद्राजहंसमिथुनमेवमनासादितविरहं समागमसुखमनुभवतीति नास्ति दंपत्योर्मम विरहसम उपदेशनिपुण उपाध्यायः, येन पक्षिणोऽपि अन्योऽन्यहृदयग्रहणसमर्थललितमधुराश्चाटुप्रयोगं प्रस्थापयंति)

य—(निर्वर्ण्य) जह एसो ससंभमतक्कणविमुत्तासणो परिग्गहअंसदेससमुल्लिवत्तवक्कलो सुअसंअमणपाउधो विंमयोफुल्ललोअणो सव्वो जेव (एव्व) मुणिअणो एअमुखओ अपसरिदो तह जाणामि संपत्तेण महाराएण होदंवंति । (इति निष्क्रान्ता)

(यथैष ससंभ्रमतत्क्षणविमुक्तासनः परिग्रहांसदेशासमुत्क्षिप्तवल्कलः ····· विस्मयोत्फुल्ललोचनः सर्व एव मुनिजनः एकमुखकः अपसृतस्तथा जानामि संप्राप्तेन महाराजेन भवितव्यमिति)

(ततः प्रविशति रामः सचिन्तः कण्वश्च)

कण्वः—आदिष्टोऽस्मि भगवता वाल्मीकिना—कण्व, कण्व, दाशरथिं नैमिशारण्यरामणीयकदर्शनेन विनोदय—इति । एष पुनश्चिन्तापराधीनत्वात्पुरोगामिनमपि मां नावगच्छति । तथा हि—

स्खलति मुहुरयं समेऽपि मार्गे
निभृतगतिः प्रविलम्बते विदूरात् ।
अवनतवदनो नितान्तरम्ये
न च नयने निदधाति काननेऽस्मिन् ॥ १ ॥

(उपसृत्य) भो राजन्,

रा—हन्त, वयस्य, तापसविरुद्धमामन्त्रणम् । अथवा वयसः परिणामेनेदमपराद्धं मे भगवता ।

अहं रामस्तवाभूवं त्वं मे कण्वश्च शैशवे ।
यूयमार्या वयश्चाद्य राजानो वयसा कृताः ॥ २ ॥

क—अहो धीरोदात्तोऽयमुपालम्भः ।

रा—उच्यतां यद्विवक्षितम् ।

क—सुरभिकुसुमगन्धैर्वासिताशामुखानां
फलभरनमितानां पादपानां सहस्रैः ।
विरचितपरिवेषश्यामलोपान्तरेखो
रमयति हृदयं ते हन्त कश्चिद्वनान्तः ॥ ३ ॥

रा—बहुमाननिरन्तरीकृतमानसं मां तपोवनमिदं रमयति न रमयतीति कथनावकाश एव नास्ति । पश्य—

दावाग्नि क्रतुहोमपावकधिया यूपास्थया पादपान्
अव्यक्तं मुनिगीतसामगतया भक्त्या शकुन्तस्वनम् ।
वन्यांस्तापसगौरवेण हरिणान् संभावयन्नैमिशे
सोऽहं यन्त्रणया कथं कथमपि न्यस्यामि पादौ भुवि ॥ ४ ॥

क—युक्तरूपोऽयं धर्मैकपरायणस्य महाराजस्य सकलजगदभ्युदयनिःश्रेयसहेतोर्निष्प्रत्यूहतपःसिद्धिक्षेत्रे पूर्वराजर्षिवंशाध्यासिते नैमिशे बहुमानः ।

आनाकमेकधनुषा भुवनं विजित्य
पुण्यैर्दिवः क्रतुशतैर्विरचय्य मार्गम् ।
इक्ष्वाकवः सुतनिवेशितराज्यभारा
निःश्रेयसाय वनमेतदुपाश्रयन्ते ॥ ५ ॥

रा—(प्रणमति)

क—इदमनन्यतपोवनसाधारणं नैमिशस्य माहात्म्यमवलोकय—

अस्मिन् सन्निवसन्महेश्वरशिरस्ताराधिपज्योत्स्नया
मिश्रीभूय कवोष्णतामुपगतास्तिग्मो निदाघातपः ।
न म्लानिं तरुपल्लवेषु सरसां तोयेषु नैव क्षयं
सन्तापं न जनस्य किन्तु जनयत्यालोकमात्रं दृशाम् ॥ ६ ॥

किञ्च,—

एतस्मिन्विततध्वरे प्रतिदिनं सान्निध्ययोगाद्धरे
स्त्यक्त्वा नन्दनचन्दनावनिरुहानालानतां प्रापिताः ।
बिभ्रत्युच्चनिवेशितेन नयनेनालोकनीया अमी
मत्तैरावणकण्ठरज्जुवलयन्यासक्षतिं पादपाः ॥ ७ ॥

रा—(विलोक्य) सततप्रवृत्तमहाध्वरेण धर्मारण्येन नन्दनवनमपि विस्मारितो भगवान् पुरन्दरः ।

सचकितमवधाय कर्णमस्मिन्
सुरपतिकर्षणमन्त्रनिःस्वनेषु ।
विरचयति शची सदैव नूनं
स्रजमवधूय वियोगवेणिबन्धम् ॥ ८ ॥

क—इदमपरं न पश्यसि—

अस्मिन् कपोलमदपानसमाकुलानां
विघ्नं न जातु जनयन्ति मधुव्रतानाम् ।
सामध्वनिश्रवणदत्तमनोऽवधान-
निष्पन्दमन्दमदवारणकर्णतालाः ॥ ९ ॥

रा—(विहस्य) किमत्राश्चर्यम्—

मुनीनां सामगीतानि पुण्यानि मधुराणि च ।
प्रवासिनामपि मनो हरन्ति किमु दन्तिनाम् ॥ १० ॥

क—(आत्मगतम्) अहो रामस्य प्रवासे महान्निर्वेदः, यदयं तिर्यग्भ्योऽपि प्रवासिन एव शून्यहृदयानवगच्छति । (प्रकाशम्) इतस्तावदवधीयतां दृष्टिः—

मुक्त्वा वसन्तविरहेऽपि मुनिप्रभावा-
दुन्निद्रसान्द्रकुसुमां सहकारशाखाम् ।
धावन्त्यमी मधुकराः क्रतुहोमधूम-
सन्त्रासिताः सरसि वारिरुहोदराणि ॥ ११ ॥

रा—कथमनवरताहुतिसंवर्द्धितो धूमराशिर्मधुकरानिवास्मान् पर्याकुलयितुं प्रवृत्तः । (धूमसंबाधां नाटयति)

क—भो भोः किं बाढं धूमेन पर्याकुलनयन इवासि संवृत्तः ।

रा—सीताविरहबाष्पेण क्षरता नित्यदुःखिते ।
बाढमायासिते भूयो धूमेन मम लोचने ॥ १२ ॥

क—तदेनामग्रतोवर्तिनीमाश्रमदीर्घिकामवगाह्य शीतलेन सलिलेन क्षालितव्यपनीतनयनखेदं विश्रम्य मुहूर्तमत्र तिष्ठतु । अहमपि कुलपतेरग्निहोत्रवेलां सन्निधानेन संभावयामि । (इति निष्क्रान्तः)

रा—(परिक्रम्य) एतद्दीर्घिकातीरमवतरामि । (अवतीर्य) अहो प्रसन्नसलिलता कमलाकरस्य ! (उदकमध्ये च्छायां निर्वर्ण्य ससंभ्रमम्) कथं सीताप्यत्रैव ! (हर्षविस्मयं नाटयति)

सी—(विलोक्य) हद्धी हंसमिहुणदंसणवावुदाए मए अतक्किदसमाअदो अंअउत्तो ण संलक्खिदो । ता ओसरिस्सं । (तथा करोति) (हा धिक् हंसमिथुनदर्शनव्यापृतया मया अतर्कितसमागत आर्यपुत्रो न संलक्षितः । तदपसरामि)

रा—कथमसंभाव्यैव मां प्रस्थिता सीता ।

आपाण्डुरेण मयि दीर्घवियोगखेदं
लम्बालकेन वदनेन निवेदयन्ती ।
एषा मनोरथशतैः सुचिरेण दृष्टा
क्वापि प्रयाति पुनरेव विहाय सीता ॥ १३ ॥

तदेनामवलम्बे । (बाहू प्रसार्य) नैषा वैदेही, किन्तु—

वैदेह्याः क्वापि गच्छन्त्या दीर्घिकातीरवर्त्मना ।
अन्तर्गतजलच्छाया मया सैवेति वीक्षिता ॥ १४ ॥

तदस्याः प्रतिकृतेर्मूलप्रकृतिमन्वेषयामि । (अन्वेषणं नाटयति) निःसंपातविविक्तमिदं दीर्घिकातीरम्, बिम्बेन च विना प्रतिबिम्बमित्यसंभाव्यमेतत् । किमिदम् ?

सी—पेण्वदे पडिकिदिं, कहं ण पेक्खदि मं अंअउत्तो ।

(विचिन्त्य) होदु विण्णादं; मुणिप्पसादो एसो तपोवणवासिणीणं इत्थिआणं एदस्सिं दीहिआतीरे पुरुसणअणाणं अगोअरदा । जदि पडिकिदिए वि अदंसणं महेसिणा आदिट्ठं भवे तदा अअं जणो अणुग्गहिदो भवे । अहं वि जाव जह एसा पडिकिदी ण दीसइ तह ओसरिस्सं । (अपसरति)

(प्रेक्षते प्रतिकृतिं कथं न प्रेक्षते मामार्यपुत्रः । (—) भवतु, विज्ञातम् मुनिप्रसाद एष तपोवनवासिनीनां स्त्रीणामेतस्मिन् दीर्घिकातीरे पुरुषनयनागोचरता । यदि प्रतिकृतेरप्यदर्शनं महर्षिणा आदिष्टं भवेत् तदायं जनोऽनुगृहीतो भवेत् । अहमपि तावत् यथैषा प्रतिकृतिर्न दृश्यते तथापसरामि)

रा—तामेव तावत् प्रसन्नसलिलमध्यवर्तिनीं प्रतिमासीतामवलोकयामि । (विलोक्य) कथं साप्यन्तर्हिता । (मोहं गच्छति)

सी—हद्धी ! हद्धी ! मोहं गदो अंअउत्तो । उपसप्पिस्सं । (परिक्रामति) अहवा जदि संलक्खिदो अंअउत्तो पुणो वि कुप्पिस्सदि । तदा मुणिअणा अविणीदेत्ति मं संभावइस्संति । ता गमिस्सं । (निवृत्य) अहवा ण एसो जुत्ताजुत्तविआरणस्स कालो, कुप्पदु वा मं अंअउत्तो, मुणिअणो वा अविणीदेत्ति संभावेदु । संवहा ण सक्कणोमि एदारिसावत्थं गदं अंअउत्तं उवेक्खिदुं । (परिक्रामति) सुण्णंतु भवन्तो लोअवाला, अहं अंअउत्तेण णिव्वासिदा, संपदं अविणीददाए अंअउत्तस्स ण सासणं खु अदिक्कमामि, किंदु सोआवेअबलक्कारिदा अत्तणो ण प्पहवन्ती ईदिसं साहसं अणुचिट्ठामि । (उपसृत्य निर्वर्ण्य) हद्धी हद्धी ! परिच्चत्तचेदणो विअ अंअउत्तो । (परिष्वजते)

(हा धिक्, हा धिक्, मोहं गत आर्यपुत्रः । उपसर्पामि । (—) अथवा यदि संलक्षित आर्यपुत्रः पुनरपि कोपिष्यति । तदा मुनिजना अविनीतेति मां संभावयिष्यन्ति । तद्गमिष्यामि । (–) अथवा नैष युक्तायुक्तविचारणस्य कालः, कुप्यतु वा मामार्यपुत्रः, मुनिजनो वाविनीतेति संभावयतु । सर्वथा न शक्नोमि एतादृशावस्थां गतमार्यपुत्रमुपेक्षितुम् । (—) शृण्वन्तु भवन्तो लोकपालाः, अहमार्यपुत्रेण निर्वासिता सांप्रतमविनीततयार्यपुत्रस्य न शासनं खलु अतिक्रमामि, किन्तु शोकावेगबलात्कारिता आत्मनो न प्रभवन्ती ईदृशं साहसमनुतिष्ठामि । (–) हा धिक् हा धिक् परित्यक्तचेतन इवार्यपुत्रः) (–)

रा—(प्रत्यागमनं नाटयति)

सी—(अपसरणं नाटयति)

रा—कथमकस्मादेव रोमाञ्चितोऽस्मि ?

सी—तह णाम णिव्वासिदा ईदिसं साहसं अणुचिट्ठिअ जं सच्चं भीदंमि संवुत्ता । (तथा नाम निर्वासिता ईदृशं साहसमनुष्ठाय यत्सत्यं भीतास्मि संवृत्ता)

रा—(विलपन्)—गाढपाश्लिष्ट वैदेहि—

सी—अणवरद्धंमि । (अनपराद्धास्मि)

रा— देहि मे दर्शनं प्रिये

सी—पहवदि सिद्धसासणं, किं एत्थ करेमि मंदभाआ । (प्रभवति सिद्धशासनं, किमत्र करोमि मन्दभागा)

रा—त्यज्यतां दीर्घरोषोऽयं—

सी—अहं वि अंअउत्तं एव्वं विण्णवेमि । (अहमप्यार्यपुत्रमेवं विज्ञापयामि)

रा— किं नु निष्करुणा मयि ॥ १५ ॥

सी—अंअउत्त, विवरीओ खु उवालंभो । (आर्यपुत्र, विपरीतः खलूपालम्भः)

रा—देवि विज्ञापयामि त्वां,—

सी—अवहिदंमि एसा, आणवेहि । (अवहितास्म्येषा, आज्ञापय)

रा— यत्त्वं चारित्रशालिनी ।

सी—अहो—अच्चाहजोग्गा पाणा । (अहो अत्यागयोग्याः प्राणाः)

रा—निर्वासितासि विषयात्—

सी—पहवदि अंअउत्तो सअलस्स परिअणस्स । (प्रभवत्यार्यपुत्रः सकलस्य परिजनस्य)

रा— अस्मिन् दोषे प्रसीद मे ॥ १६ ॥

सी—तुमं पसीद, णिच्चप्पसण्णा अहं । (त्वं प्रसीद, नित्यप्रसन्नाहम्)

रा—कदा बाहूपधानेन पटान्तशयने पुनः ।

गमयेयं त्वया सार्द्धं पूर्णचन्द्रां विभावरीम् ॥ १७ ॥

सी—अयि जणवादभीरुअ, एत्थ सण्णिहिदे जणे संतपसि । (अयि जनवादभीरुक, अत्र सन्निहिते जने सन्तपसि)

रा—हा! प्रिये जनकराजपुत्रि, देहि मे प्रतिवचनम्। (मोहं गच्छति)

सी—कहं पुणो वि अंअउत्तो मोहं गदो। समस्सस्सं। (कथं पुनरपि आर्यपुत्रो मोहं गतः। समाश्वासयामि। (पटान्तेन वीजयति)

रा—(हस्तं प्रसार्य पटान्तं गृण्हाति) कथं पटान्त इव संलक्ष्यते। कोनु खल्वेष भविष्यति ?। (विचिन्त्य)

अथवा—

जनकदुहितरं विहाय देवीं
जनमपरं भुवने तथाप्रभावम्।
अहमिह न विलोकयामि या मे
स्पृशति पटान्तसमीरणैः शरीरम् ॥ १८ ॥

तदेनामवलोकयामि। (चक्षुरुन्मीलयन्) अनवरतबाष्पपिहितलोचनतया न किञ्चिदपि दृश्यते। तस्मादेनमपकृष्य तावदपनयामि। (तेनैवोत्तरीयान्तेनाश्रूणि प्रमार्जन्नाकर्षति)

सी—(उत्तरीयं मुञ्चति) अंअउत्त ण तुए परकेरएण उत्तरीएण पणअकोविदस्स विअ जणस्स अस्सुप्पमंज्जणं अणुचिट्ठिदव्वं।

(आर्यपुत्र न त्वया परकीयेनोत्तरीयेण प्रणयकोविदस्य [कोपितस्य] इव जनस्याश्रुप्रमार्जनमनुष्ठातव्यम्)

रा—(उत्तरीयं पतितमवलोक्य) कथमुत्तरीयमात्रमेव पश्यामि, न पुनः परिधानकम्।

अन्यांशुकमतिरभसादविमृश्यविधायिना मयाकृष्टम्।
गगनतलात्परिगलितं ज्योत्स्नानिर्मोकललितमिदम् ॥ १९ ॥

(पुनर्निर्वर्ण्य) किमपरमकस्मादेवासमीक्ष्यकारिणमात्मानमवगच्छामि। सुव्यक्तं तयै (दे) व चित्रकूटवनदेवतया मायावत्या प्रदर्शितम्—

द्यूते पणः प्रणयकेलिषु कण्ठपाशः
क्रीडापरिश्रमहरं व्यजनं रतान्ते ।
शय्या निशीथकलहे हरिणेक्षणायाः
प्राप्तं मया विधिवशादिदमुत्तरीयम् ॥ २० ॥

सी—दिट्ठिआ अहिण्णादं अंअउत्तेण । (दिष्ट्या अभिज्ञातमार्य-पुत्रेण)

रा—कीदृशमिदानीमस्य प्रियावल्लभस्य संमानविशेषमनुतिष्ठामि । (विचिन्त्य) भवतु, अयमेवास्यानन्यसाधारणः संमानविशेषः । (प्रावृणोति) (आत्मानं प्रावृत्य अवलोक्य) द्वितीयप्रावरणं मामवलोक्य किमपि चिन्तयिष्यति मुनिजनः । तस्मादात्मीयमुत्तरीयं परित्यजामि । (इति उत्क्षिपति)

सी—(गृहीत्वा सहर्षम्) पिअं मे संवुत्तं चिरजीविदाए फलं । (आघ्राय) दिट्ठिआ असंकंतविळेवणामोअं अंअउत्तस्स उत्तरीअं । सव्वहा सच्चसंधा राहवा । (प्रावृत्य) अम्हे एदं पिअजणसंसग्गसुह-प्पिरिसं उत्तरीअं पावरिअ अंअउत्तवच्छत्थळपरिस्संतं विअ अविरळसमु-ब्भिण्णरोमंचणिरंतरं अत्ताणं उव्वहामि ।

(प्रियं मे संवृत्तं चिरजीविताया: फलम् । (–) दिष्ट्या असंक्रान्त-विलेपनामोदमार्यपुत्रस्योत्तरीयम् । सर्वथा सत्यसन्धा राघवाः । (–) अहो एतत् प्रियजनसंसर्गसुखस्पर्शमुत्तरीयं प्रावृत्यार्यपुत्रवक्षःस्थलपरिश्रान्तमि-वाविरलसमुद्भिन्नरोमाञ्चनिरन्तरमात्मानमुद्वहामि)

रा— (सविस्मयम्) यथैतदुत्तरीयमप्राप्तमहीतलमेव केनाप्यपहृतं तथा जानामि प्रत्यासन्नफलो मे मनोरथ इति । (विचिन्तयन्) उत्तरी-यापहारो जलच्छायायां दृश्यते, न सीता; किमेतत् ? भवतु सिद्धाश्रम-

वासिभ्यो जनेभ्योऽस्याः प्रभावो भविष्यति । तत् कोनु खल्वस्याः प्रत्यासन्नदर्शनेऽभ्युपायः । अयि वैदेहि, न किञ्चित् स्मरसि कस्यचित् पूर्ववृत्तान्तस्य, यन्मामेवं दर्शनमात्रेणापि न संभावयसि ।

सी—अज्जवि कीदिसो पूव्ववुत्तन्तो । (अद्यापि कीदृशः पूर्ववृत्तान्तः)

रा—अविदितमनुसृत्य चित्रकूटे
सुतनु सुमापचयाय निर्गतां त्वाम् ।
कुसुममपचितं विकीर्य भूमौ
स्मरसि रसेन मया धृतं पटान्तम् ॥ २१ ॥

सी—(विहस्य) साहसिअ अदो एव्व दूरे परिहरिअसि । (साहसिक, अत एव दूरे परिहियसे)

रा—कथं न किंचिदपि प्रतिवचनं प्रयच्छति ?

सी—आसण्णा मम दिअहावसाणवेला । ण जुत्तं अ एतावत्थं गदं अंअउत्तं देवदादुदिअं कदुअ अपक्कमिदुं । ता किं एत्थ करइस्सं । (दिशोऽवलोक्य) दिट्ठिआ एसो पिअवअस्सो कोसिओ किंवि अण्णेसंतो विअ कोदूहलसमावेसणिव्वत्तलोअणो इदो एव्व आअच्छइ, ता ओसरिस्सं । (निष्क्रान्ता)

(आसन्ना मम दिवसावसानवेला । न युक्तं चैतदवस्थां गतमार्यपुत्रं देवताद्वितीयं कृत्वापक्रमितुम् । तत् किमत्र करिष्यामि । (–) दिष्ट्या एष प्रियवयस्यः कौशिकः किमप्यन्विष्यन्निव कौतूहलसमावेशनिश्चललोचन इत एवागच्छति । तदपसरामि)

(ततः प्रविश्यान्वेषमभिनयन् विदूषकः)

वि—कहिं णु खु तत्तभवं भविस्सदि राआ । (परिक्रम्यावलोक्य च) एसो पिअवअस्सो चिन्ताउलो विअ णिलुक्कमणोहराए आकिदीए दीहिआतीरं अलंकरेइ, ता उवसप्पिस्सं । (उपसृत्य) जेदु भवं ।

(कुत्र खलु तत्रभवान् भविष्यति राजा । (–) एष प्रियवयस्यश्चिन्ताकुल इव निभृतमनोहरया आकृत्या दीर्घिकातीरमलङ्करोति । तदुपसर्पामि । (–) जयतु भवान् ।

रा—(विलोक्य) दिष्ट्या प्रियवयस्यः कौशिकः प्राप्तः । वयस्य कौशिक, कुतो भवान् ?

वि—अज्ज सूरोदअप्पहुदि मम तुमं अण्णेसमाणस्स सअलो दिअहो अदिक्कंदो । (अद्य सूर्योदयप्रभृति मम त्वामन्वेषमाणस्य (?) सकलो दिवसोऽतिक्रान्तः ।

रा—किंकृतोऽयमस्मदन्वेषणे भवतः प्रयासः ?

वि—सुदं मए पहादए समए अदिमुत्तमंडपब्भंतरे पच्छण्णट्ठिदेण विस्सद्धपउत्तसंकहाणं मुणिकण्णआणं अच्छराणं वि मुहादो किंवि तवोवणरहस्सं मंतिअमाणं । तं तुह अप्पिअं आसी । अब्भंतरट्ठिदं विअ गूढगब्भं अहिअदरं बाहेइ ।

(श्रुतं मया प्राभातिके समयेऽतिमुक्तामंडपाभ्यन्तरे प्रच्छन्नास्थितेन विस्रब्धप्रवृत्तसङ्कथानां मुनिकन्यकानामप्सरसामपि मुखतः किमपि तपोवनरहस्यं मन्यमाणम् । तत् तव च [अ] प्रियमासीत् । अभ्यन्तरस्थितमिव गूढगर्भमधिकतरं बाधते)

रा—कीदृशं तपोवनरहस्यम् ?

वि—भो किं ण जाणासि तत्तहोदी–(भोः किं न जानासि तत्रभवती)

रा—(कर्णौ पिधाय) स्त्रीसंबद्धमेव तद्रहस्यम्, तदलमनेन श्रुतेन ।

वि—मा भयाहि, रामवअस्सो खु अहं । ण जाणासि तत्तहोदिं पुराणसग्गदासिं–(मा भीः, रामवयस्यः खल्वहम् । न जानासि तत्रभवतीं पुराणस्वर्गदासीम्–)

रा—(आत्मगतम्) देवगणिकासंबद्धैषा कथा, न कश्चिद्दोषस्तदा कर्णने । (प्रकाशम्) कतमासौ पुराणस्वर्गदासी किमुर्वशी किं तिलोत्तमा ?

वि—हे राम, पिअवयस्स, रामत्ति खणे खणे अलिअमहुरेहिं वअणेहिं आउलयसि । (हे राम प्रियवयस्य रामेति क्षणे क्षणे अलीकमधुरैर्वचनैराकुलयसि)

रा—किं तिलोत्तमा ?

वि—ण आणामि किं तिलुत्तमा सिळुत्तमेत्ति । सा किल तत्तहोदीए चिरकाळविउत्ताए विदेहराअतणआए चरिदं अणुचिट्ठिय पिअवयस्सं उपहसिदुं इच्छइ ।

(न जानामि किं तिलोत्तमा सिलोत्तमेति । सा किल तत्रभवत्याश्चिरकालवियुक्तायाः विदेहराजतनयायाश्चरितमनुष्ठाय प्रियवयस्यमुपहसितुमिच्छति)

रा—(आत्मगतम्) कष्टं सम्यगुपलक्षितं कौशिकेन । अन्यथा हि दृश्यमाने प्रियासन्निधानाभिज्ञाने स्वयं न दृश्यत इत्यसंभाव्यमेतन्मानुषीषु । सर्वथा वञ्चितोऽस्मि कामरूपिण्या तिलोत्तमया ।

तृषितेन मया मोहात् प्रसन्नसलिलाशया ।
अञ्जलिर्विहितः पातुं कान्तारमृगतृष्णिकाम् ॥ २२ ॥

(उत्तरीयमवलोक्य) कथमुत्तरीयमपि निर्मितमतिमायाविन्या । अहो परवञ्चनायामतिमहन्नैपुणम् !

वि—भो वयस्स, विळक्खमुहो विअ दीससि । किं ताए वंचिदोसि ? (भो वयस्य विलक्षमुख इव दृश्यसे । किं तया वञ्चितोऽसि)

रा—वञ्चितः कृतोऽस्मि ।

वि—किं मए सुदं रहस्सं अण्णहा होदि ? (किं मया श्रुतं रहस्य-मन्यथा भवति)

(नेपथ्ये)

सन्ताप्य लोकमखिलं निरवग्रहेण
तीव्रो नरेश्वर इव प्रथमं स्वधाम्ना ।
सोऽयं वयःपरिणतेरिव शान्ततेजाः
सायं मृदुर्भवति तिग्मरुचिः क्रमेण ॥ २३ ॥

रा—(निर्वर्ण्य) अस्तं गच्छति भगवान् दिवाकरः ।

प्रियजनरहितानामङ्गुलीभिर्वधूना—
मवधिदिवससंख्याव्यापृताभिः सहैव ।
व्रजति किरणमालिन्यस्तमेकैकशोऽस्मिन्
सरसकमलपत्रश्रेणयः सङ्कुचन्ति ॥ २४ ॥

अपि च—

आकर्षोत्प्रग्रहाणां नियमितगतयश्चोदितास्तोत्रपातै-
र्नैव स्थातुं न यातुं सचकितचरणाः सारथेः पारयन्तः ।
दुर्विन्यस्तैः खुराग्रैर्विषमपरिसरादस्तशैलस्य शृङ्गा-
द्राहन्ते वारिराशिं कथमपि विधुरा वाजिनस्तिग्मरश्मेः ॥२५॥

(इति निष्क्रान्ताः सर्वे)

इति चतुर्थोऽङ्कः

पञ्चमोऽङ्कः

(ततः प्रविशति विदूषकः)

वि—(नेपथ्याभिमुखमवलोक्य) आसण्णो तपोधणाणं संपातसमओ, ता तुवरेदु भवं। (आसन्नस्तपोधनानां संपातसमयः, तत् त्वरतु भवान्)

(ततः प्रविशति रामः)

रा—सवनमवसितं हुतं कृशाना-
वुदयगतः समुपासितो विवस्वान्।
इति विधिमवसाय्य वासरादौ
नियमधनानहमागतः प्रणन्तुम् ॥ १ ॥

वि—एदं अत्थाणमंटपं, पविसदु भवं। (एतदास्थानमण्टपम्, प्रविशतु भवान्)

रा—(प्रविष्टकेन चिन्तां नाटयन्)

आ! आश्चर्यमस्माकं किं वृत्तमतीतेऽहनि ?

अतिप्रसादादसतीव तस्मिन्
दृष्टा मया वारिणि पङ्कजाक्षी।
लम्बालकं पाण्डुरपीनगण्डं
प्रसादरम्यं वदनं वहन्ती ॥ २ ॥

अथ वा विलोक्यते तिलोत्तमया कृतोऽयं परिहास इति।

तस्याः स्वहस्तरचितामिव कुन्दमालां
सादृश्यवन्ति सिकतासु पदानि तानि।
छायां च देवगणिका विदधातु येन
रामं कथं स्पृशति हस्तपटान्तवातैः ॥ ३ ॥

(चिन्तां नाटयति)

वि —एसो सचिन्तो विअ, अज्ज ता उपविसिअ णिब्बन्धइस्सम् ।

(एष सचिन्त इव, अद्य तदुपविश्य निर्बन्धयिष्यामि)

(उपविश्य)

भो भो वअस्स, मा तुमं एत्थ ठिदो खु कहिं ठिदो खु तुमं णवमेहसिणिद्धस्सामलो परिणद्धमुत्ताहारो अच्चंदसमुण्णद्धदुरारोहाणं इंदनीलमआणं भवणक्कंभाणं अण्णतमो विअ मम हिअअविब्भमं उप्पादेसि । ता एदस्स लक्खीणिवासभवणस्स सेवासमअसमुवागदसामंतणरिंदमहुरसद्दोपगीतस्स अत्थाणदासेरमंडपपुंण्डरीअस्स कण्णिआमंडले विअ एदस्सिं सिंहासणे महुमहणणाभीकमलकण्णिआसमारूढस्स भअवदो पिदामहस्स महत्तणं अधिक्खिपंतो उवविट्ठो होहि । (भो भो वयस्य, मा त्वमत्र स्थितः खलु कुत्र स्थितः खलु त्वं नवमेघस्निग्धश्यामलः परिणद्धमुक्ताहारोऽत्यन्तसमुन्नद्धदुरारोहाणामिन्द्रनीलमयानां भवनस्तम्भानामन्यतम इव मम हृदयविभ्रममुत्पादयसि । तदेतस्य लक्ष्मीनिवासभवनस्य सेवासमयसमुपागतसामन्तनरेन्द्रमधुरशब्दोपगीतस्यास्थानदासेरमण्टपपुण्डरीकस्य कर्णिकामण्डल इवैतस्मिन् सिंहासने मधुमथननाभीकमलकर्णिकासमारूढस्य भगवतः पितामहस्य महत्त्वमधिक्षिपन्नुपविष्टोभव)

रा—यथाह भवान् । (उपविश्य चिन्तां नाटयन्) अद्याहमभिनवसुखदुःखस्य सचेतन इवास्मि संवृत्तः, (ध्यानमभिनीय हस्तं च हृदये निवेश्य)

आसीदियत्सु दिवसेषु निरस्तजाने-
नैराश्यशून्यमनसो न सुखं न दुःखम् ।
छायादिदर्शनबलादधुना मनो मे
दुःखं सुखं च परिगृह्य पुनः प्रसूतम् ॥ ४ ॥

(चिन्तां नाटयति)

वि—(निर्वर्ण्यात्मगतम्) अहो से संपदं अभिप्पाअं लक्खइस्सम् । (प्रकाशम्) भो राअं, एदे आसणकेसरिणो गुरुदरभरुव्वेहणजादपरिस्समा विअ मुहविवरविणिग्गअमुत्ताकलावच्छलेन फेणधारं उव्वमंति, तह तक्केमि बाहूजुअलेण पुढवीं हिअएण पुढवीदुहिदरं उव्वहंतो अदीव गुरुअरो संवुत्तोत्ति ।

(अहो ! अस्य सांप्रतमभिप्रायं लक्षयिष्ये । (—) भो राजन्, एते आसनकेसरिणो गुरुतरभारोद्वहनजातपरिश्रमा इव मुखविवरविनिर्गतमुक्ता-कलापच्छलेन फेनधारामुद्वमन्ति, तथा तर्कयामि बाहुयुगलेन पृथिवीं हृदयेन पृथिवीदुहितरमुद्वहन्नतीव गुरुतरः संवृत्त इति)

रा—(आत्मगतम्) सीताकथामुपश्रुत्य (क्षिप्य) कौशिको नूनं जिज्ञासते; एष बालमित्रम्, तदस्मै यथास्थितं निवेदयामि । (प्रकाशम्) वयस्य, अस्त्येतत् स्मराम्यहमविच्छेदेन वैदेहीम् ।

वि—किं दोसदो आदु गुणदो ? (किं दोषतः, उत गुणतः ?)

रा—न दोषतो नापि गुणतः ।

वि—एदं उभयं उज्झिअ कहं सीमन्तिणीओ सुमरीअंति ?

(एतदुभयमुज्झित्वा कथं सीमन्तिन्यः स्मर्यन्ते ?)

रा—अन्यदम्पतीविषय एव कारणानुरोधी प्रेमावेशः, सीतारामयोस्तु न तथा ।

दुःखे सुखेष्वप्यपरिच्छदत्वा-
दसूच्यमासीच्चिरमात्मनीव ।
तस्यां स्थितो दोषगुणानपेक्षो
निर्व्याजसिद्धो मम भाववन्धः ॥ ५ ॥

वि—मा सुमं वैदेहिं अलिअमहुरवअणेहिं अंहारिसं वंचेसि । सो खु तुमं देविं अंतरेण ।

(मा सुमं(?) वैदेहिं अलीकमधुरवचनैरस्मादृशं वञ्चयसि। स खलु त्वं देवीमन्तरेण)

रा—नैवमध्यवसितं—एकान्ते सीतानिरपेक्षो राम इति ।

अन्तरिता अनुरागा
भावा मम कर्कशस्य बाह्येन ।
तन्तव इव सुकुमाराः
प्रच्छन्नाः पद्मनालस्य ॥ ६ ॥

वि—तुमं अदिप्पवळेण हिअसंदावेण बडवाणळेण विअ भअवं महासमुद्दो अत्तणो महत्तणेण परिहीअसि। अहं उण सहावलहुदाए देवीए सीदाए गइं सुमरिअ दावाणळेण विअ तुसारबिंदु णिरवसेसं परिसुस्सामि, ता परित्ताएहि मं। (इति रोदिति)

(त्वमतिप्रबलेन हृदयसंतापेन वडवानलेनेव भगवान्महासमुद्र आत्मनो महत्वेन परिहीयसे, अहं पुनः स्वभावलघुतया देव्याः सीताया गतिं स्मृत्वा दावानलेनेव तुषारबिन्दुर्निरवशेषं परिशुष्यामि) (—)

रा—यदि त्वं स्मरणयोग्यां सीतामवगच्छसि कस्मादहं तत्परित्यागप्रवृत्तस्त्वया न प्रतिषिद्धः ?

वि—पसादसुमुहो वि राअ दुव्विण्णव्वो सेवएहिं, किं उण कोवभीसणो ।
(प्रसादसुमुखोऽपि राजा दुर्विज्ञाप्यः सेवकैः, किं पुनः कोपभीषणः)

रा—वयस्य, न हि मादृशास्तादृशीं कोपावस्थामवगाहन्ते, यस्यां वर्तमानायां सुहृदामनाश्रवा भवन्ति ।

नरपतिरधिकमवृत्ततेजा
गुणनिहितैः सचिवैर्निवारणीयः ।
भुवनमभितपन् सहस्ररश्मि—
र्जलगुरुभिर्व्यपनीयते हि मेघैः ॥ ७ ॥

वयस्य, वर्तमाना सीताकथा द्वयोः सन्तापकारिणी । तद्गच्छ प्रतीहारभूमिम् । समाज्ञापय दौवारिकान्, समासन्नस्तपोधनानां संपातसमयः, तस्मात्संभृतवेत्राणि सर्वद्वाराणि क्रियन्ताम् ।

वि—भो राअ, कीस उण एदे कंदमूळफळासिणो वक्कळपरिधाणा उद्दंडदंडधरा ईरिसेण आआरेण संभाविअंति ।

(भो राजन्, कीदृशाः पुनरेते कन्दमूलफलाशिनो वल्कलपरिधाना उद्दण्डदण्डधरा ईदृशेनाचारेण संभाव्यन्ते)

रा—अस्थानेऽयमत्रभवतः सन्देहः । ननु मूलस्वयोगमूलसकलपुरुषार्थसंवेदिनी ज्ञाननिष्पत्तिः । (?) पश्य—

ज्योतिः सदाभ्यन्तरमाप्तपादै-
रदीपितं नार्थगतं व्यनक्ति ।
नालं हि तेजोऽप्यनलाभिधानं
स्वकर्मणो मारुतमन्तरेण ॥ ८ ॥

वि—जदि महत्थो तपोधणाणं समाअमो अह अ ळहु गच्छिअ महआणत्ति संपादेमि (निष्क्रम्य पुनः प्रविश्य) ही ही सो संपदं मए राइणो आण्णाए पडिहारणिक्खित्तेण दिट्ठा सुसिणिद्धसामळच्छाआ अणुब्भिण्णतारुण्णविग्गहा तोरणत्थंभवट्ठिदा मंगळंकुरा विअ बाळभावेण असमत्तपमाणा विअ अप्पमाधा विअ कंदप्पदारआ विअ रुपसोवग्गेण उच्चदरा साळतरु विअ पप्पंदा विअ लोळदरा विअ महाबळा विअ अचंतधीरा विअ अच्चंदलळिदा विअ अप्पंखेपिदा विअ वअस्सस्स कळादंसणा आगदा दुवे तापसकुमारआ ।

(यदि महार्थस्तपोधनानां समागमः अहं च लघु गत्वा यथाज्ञप्ति संपादयामि । (–) ही ! ही ! सांप्रतं मया राज्ञ आज्ञया प्रतीहारनिक्षिप्तेन दृष्टौ सुस्निग्धश्यामलच्छायौ अनुद्भिन्नतारुण्यविग्रहौ तोरणस्तंभावस्थितौ

मङ्गलाङ्कुराविव बालभावेन, असमाप्तप्रमाणाविव, अप्रमादाविव, कन्दर्पदारकाविव रूपसौभाग्येन, उच्चतरौ सालतरू इव, प्रस्पन्दाविव, लोलतराविव, महाबलाविव, अत्यन्तधीराविव, अत्यन्तललिताविव, असंक्षेपिताविव, वयस्यस्य कलादर्शनौ आगतौ द्वौ तापसकुमारकौ)

रा—(साकूतम्) कस्तयोरस्मन्नयनसीमावतरणप्रतिबन्धः ?

वि—सुणाहि दाव एदाणं बाळभावललिदाणं कोऊहळसंबद्धाणं एदं उवंणासं । (शृणु तावदेतयोर्बालभावललितयोः कौतूहलसंबद्धयोरेतमुपन्यासम्)

रा—कथय कथय ।

वि—ते किळ भअवदो वम्मीइमहेसिणो सिस्सा पवीणा वीणाकळाविण्णाणे अपुव्वं किल आअमं धारिंति । एदे किळ एव्वं वदंति—राएसिणो जणाणं तपोधणबहुमाणेण अह्माणं विअ भूट्ठाणं आसणं पदाणं अ अणुचिट्ठिदव्वं । जदा अंहे मंदभद्दस्स दीअइ रादळळअ दुक्खरविण्णासं महाकइसंगधितमहापुरुसचरित्तबंधं महन्थगंभीरं केण वि अस्सुदपुव्वं आअमं गंधव्ववेदवसंवादि सरसं जोअविरइअवण्णरमणीअअं वीणातंतिरासिदाणुविद्धं गीदं गाअंह्म तदा विण्णाणविसेसपसण्णहिअओ राआ जं वुत्तंतं अणुचिट्ठस्सादि एसो जाणिदंवोत्ति अह्माणं भअवदो वंमीइमहेसिणो आदेसोत्ति ।

(तौ किल भगवतो वाल्मीकिमहर्षेः शिष्यौ प्रवीणौ वीणाकलाविज्ञानेऽपूर्वं किलागमं धारयतः । एतौ किलैवं वदतः—राजर्षेर्जनानां तपोधनबहुमानेनास्माकमिव भूस्थानमासनं..... अनुष्ठातव्यम् ,..... ..... दुष्करविन्यासं महाकविसंग्रथितमहापुरुषचरित्रबन्धं महार्थगम्भीरं केनाप्यश्रुतपूर्वमागमं गान्धर्ववेदसंवादि सरसं योगविरचितवर्णरमणीयकं वीणातन्त्री-

रसितानुविद्धं गीतं गायावः तदा विज्ञानविशेषप्रसन्नहृदयो राजा यद्वृत्तान्तमनुष्ठास्यति एष ज्ञातव्य इत्यस्माकं भगवतो वाल्मीकिमहर्षेरादेशः—इति ।

रा—अहो विज्ञानावलेपः शौण्डीर्यगर्भश्चोपन्यासः ! वयस्य, यथाभिमतं प्रतिज्ञाय प्रवेशयाविलम्बितं पुरा तौ न चिरावस्थाननिर्वेदेन पराङ्मुखीभवतः ।

वि—कुदो दाणिं णिव्वेदो? ते हि अण्णोण्णवच्चळत्तणं आआरसारिच्चं काअपक्खपरिभूसिदं च वअणं पेक्खिअ—एव्वं रामलक्खणा महाराअदसरहे धरमाणे राअट्ठाणं अळंकरंत्ता भवंति-त्ति तुह्माणं बाळभावं महाराअं अ सुमरिअ बप्फपुण्णणअणेहि सोविदल्लएहिं परिपुट्ठा चिट्ठंति । (कुत इदानीं निर्वेदः ? तौ हि अन्योऽन्यवत्सलत्वं आकारसादृश्यं काकपक्षपरिभूषितं च वदनं प्रेक्ष्य—एवं रामलक्ष्मणौ महाराजदशरथे ध्रियमाणे राजस्थानमलङ्कुर्वन्तावभूताम्—इति युवयोर्बालभावं महाराजं च स्मृत्वा बाष्पपूर्णनयनैः सौविदल्लैः परिपृष्टौ तिष्ठतः)

रा—किमस्मच्छैशवानुकारिणी तयोराकृतिः ?

वि—अह इं । (अथ किम्)

रा—वर्धते मे कुतूहलम्, तत्प्रवेशयाविलम्बितम् ।

वि—जं भवं आणवेदि ! (यद्भवानाज्ञापयति)

(इति निष्क्रान्तः)

(ततः प्रविशतो विदूषकेणोपदिश्यमानमार्गौ तापसौ कुशलवौ)

वि—इदो इदो अंभा । (इत इत आर्यौ)

(परिक्रम्य)

कुशः—(अपवार्य) वत्स लव, इदानीं भगवतो वाल्मीकेरादेशादम्बामभिवाद्य पार्थिवभवनाभिमुखं प्रस्थिते मयि काकपक्षग्रहणसंज्ञया पर्णशालायां प्रवेश्य कीदृशेन रहस्येनाम्बया पृथक्संविभक्तो भद्रमुखः ?

लवः—न खलु काश्चित्संविभागः । किन्तु तदानीं तापसजनसङ्कीर्णमुटजाभ्यन्तरं प्रविश्य बाहूपपीडं तनूदरेण परिष्वज्य शिरसि चाघ्राय सीत्कारलक्षितस्मितमधुरं साशङ्का शनैः शनैः कर्णपत्रं वर्धयन्ती स्वमुखेन मन्मुखमपवार्य एवं सन्दिष्टवती—वत्स युवाभ्यां स्वाभाविकमवलेपं परित्यज्य सत्कर्तव्यो महाराजः, कुशलं च परिप्रष्टव्यम्—इति ।

कुशः—युज्यते कुशलप्रश्नः, प्रणामस्तु कथम् ?

लवः—न कथम् ?

कुश—अप्रणन्तारः किलास्मद्वंश्याः ।

लवः—क एवमाह ?

कुशः—अम्बा ।

लवः—प्रणाममपि सैवोपदिष्टवती, न च गुरुनियोगा विचारमर्हन्ति ।

कुशः—साधयामस्तावत्, अग्रतस्तत्र यत्कालोचितमनुष्ठास्यावः ।

(परिक्रामतः)

वि—इदो इदो अंभा । (इत इत आर्यौ)

रा—(विलोक्य) नूनं तदेवैतद्वारकद्वयं कौशिकेनोपदिश्यमानमार्गमित एवाभिवर्तते । कथमस्मायितोऽस्मि ! किं नु खल्वेतत् !

न चैतदभिजानामि नाकूतमपि किञ्चन ।
तथाप्यापातमात्रेण चक्षुरुद्वाष्पतां गतम् ॥ ९ ॥

अथवा किमत्राश्चर्यम्—

आपातमात्रेण कयापि युक्त्या
सम्बन्धिनः संनमयन्ति चेतः ।
विमृश्य किं दोषगुणानभिज्ञ-
श्चन्द्रोदये श्चयोतति चन्द्रकान्तः ॥ १० ॥

निर्वर्णयामि तावत्किमाकारावेताविति । कथं द्रष्टुमपि न प्रभवामि यथा यथा कुमारावेतौ निर्वर्णयामि तथा तथा हृदयमप्यननुभूतपूर्वेण साध्वसप्रहर्ष-शोकानुक्रोशसम्भेदाचित्तेणावस्थाविशेषेणाक्रम्यमाणं मूर्च्छयेव तिरोधीयते । (मूर्च्छामभिनीय) बाष्पपातश्च कथम् ! प्रशान्त इव मे हृदयस्तम्भः बाष्पपातेन, स्वस्थीभूतोऽस्मि संवृत्तः, एतद्व्यपनीतबाष्पव्यवधानेन चक्षुषा पुनरवलोकयामि । (निर्वर्ण्य) गम्भीरोदारः सन्निवेशः, प्रशान्तमनोहरा वेषरचना, विनयोदयोदात्तमभिक्रान्तम्; सुव्यक्तमनेन युगलेन कुलीनेन भवितव्यम् ।

वि—एसो अत्तभवं राआ, उपसप्पदु अंआ जहाहिप्पाअं ।

(एषोऽत्रभवान् राजा, उपसर्पतामार्यौ यथाभिप्रायम्)

कु—वत्स लव, अपि जानासि त्वं सम्प्रत्येव प्रणामसंबन्धेन यथा मया कथितम् ?

ल—अथ सम्प्रति किम् ?

कु—यथा यथैनं पार्थिवं प्रत्यासीदामि तथा तथा हृदयोत्कम्पकारिणा साध्वसेन न प्रभवामि स्वाङ्गानाम्, परित्यक्तोऽस्मि कस्मात्तुल्यावलेपेन ? न शक्नोमि चास्य पुरस्तादनवनतमुत्तमाङ्गमुद्वोढुम्; किं बहुना एष प्रणतोऽस्मि ।

ल—कथमार्योऽप्यहमिव परमवशत्वमापादितः ! (उभौ प्रणमतः)

रा—न खलु भवद्भ्यां मर्यादालङ्घनमनुष्ठेयम् । कथं प्रणतावेव, कष्टं ब्रह्मशिरसा नतोऽस्मि । (विषादं नाटयति)

विं—भो तुवं किं विसण्णो ? एदेहिं पउत्तो पणामो ण पडिगहीदो, एत्थणतुमं परिहीयासि ।

(भो त्वं किं विषण्णः ? एताभ्यां प्रयुक्तः प्रणामो न प्रतिगृहीतः, अत्र न त्वं परिहीयसे)

रा—सम्यगुपलक्षितं कौशिकेन। आर्यावतिदाक्षिण्यपेशलौ, श्रूयताम् –

अयं भवद्भ्यामतिसम्भ्रमेण
मयि प्रयुक्तः शिरसा प्रणामः ।
भवत्विदानीं मदनुज्ञयैव
युष्मद्गुरूणां चरणोपहारः ॥ ११ ॥

वि—अप्पडिहदसासणो पिअवअस्सो । एस पणामस्स परिणामोत्ति ।

(अप्रतिहतशासनः प्रियवयस्यः—एष प्रणामस्य परिणामः—इति)

कुशलवौ—(उत्थाय) अपि कुशलं महाराजस्य ?

रा—युष्मद्दर्शनात्कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम्, न पुनरतिथिभाजनस्य समुचितस्य कण्ठग्रहस्य ? (परिष्वज्य) अहो हृदयग्राही स्पर्शः (विचिन्त्य) अनभिज्ञोऽहं तनयपरिष्वङ्गसौख्यस्य, यद्यपि तां तुलामारोहे। स्थाने खलु परिक्रामन्ति तपोवनपराङ्मुखा गृहमेधिनः । (आसनार्धमुपवेशयति)

उभौ—राजासनं खल्वेतत् न युक्तमध्यासितुम् ।

राम—सव्यवधानं न चारित्रलोपाय, तस्मादङ्कव्यवहितमध्यास्यतां सिंहासनम् (अङ्कमुपवेशयति)

उभौ—(अनिच्छां नाटयतः) राजन्, अलमतिदाक्षिण्येन ।

राम—अलमतिशालीनतया ।

भवति शिशुजनो वयोऽनुरोधा–
द्गुणमहतामपि लालनीय एव ।

व्रजति हिमकरोऽपि बालभावा-
त्पशुपतिमस्तककेतकच्छदत्वम् ॥ १२ ॥

(साश्रुरवलोकयन्पुनः परिष्वजते । विदूषकमवलोक्य)

अपि स्मरति भवान्निर्वासितायाः सीतायाः कियन्तः संवत्सरा अतिक्रान्ता इति ?

वि—(विचिन्त्य) सुमरामि मंदभाओ (हस्ताङ्गुलिप्रमाणसङ्ख्यां विगणय्य उपरिष्टान्पदाङ्गुलित्रयमपि निर्दिश्य) किं बहुणा गणिदेण, सव्वहा अज्ज दसमो संवच्चरो देवीए सीदाए सहत्थेण परिप्पेसिदाए (स्मरामि मन्दभाग्यः(—) किं बहुना गणितेन, सर्वथाद्य दशमः संवत्सरो देव्याः सीतायाः स्वहस्तेन परि प्रेषितायाः)

रा— (कुमारौ निर्वर्ण्य) यदि स्वस्तिना गर्भमपि निर्वर्तयेत् यदि काश्चिदवगाहेत तदपत्यमियता कालेनेदृशीमवस्थाम् ।

वि—हंत! तंमिदो म्हि मंदभाओ एदाए अण्णादविप्पउत्ततणअसंकहाए । (हन्त ! स्तंभितोऽस्मि मन्दभाग्य एतया अज्ञातविप्रयुक्ततनयसंकथया) (रोदिति)

रा—अहमप्येतौ तापसकुमारावलोकयन्नसह्यवेदनामवस्थामवतीर्णोऽस्मि ।

यां यामवस्थामवगाहमान—
मुत्प्रेक्षते स्वं तनयं प्रवासी ।
विलोक्य तां तां च गतं कुमारं
जातानुकम्पो द्रवतामुपैति ॥ १३ ॥

(परिष्वज्य रोदिति)

वि—(ससम्भ्रमं) अविह मुंच, सप्पं, मुंच, जीवदु तवस्सितणओ, ओदरदु सिंहासणादो। (मुञ्च, सर्पः, मुञ्च, जीवतु तपस्वितनयः, अवतरतु सिंहासनतः)

रा—(ससम्भ्रमं कुमारौ मुञ्चन्) वयस्य, किमेतत् ?

वि—सुदं मए साकेदणिवासिणं चिरजीविआणं मुहादो—जो किळ अराहवो इमं सिंहासणं अदिरोहदि तस्स मुद्धा सदहा सदहा विदळदित्ति। (श्रुतं मया साकेतनिवासिनां चिरजीवितानां मुखतः—यः किलाराघव इमं सिंहासनमधिरोहति तस्य मूर्द्धा शतधा शतधा विदलेत्—इति)

रा—(सावेगं) अवतीर्यतां शीघ्रम्।

(उभाववतीर्य भूमावुपविशतः)

रा—अपि स्वस्थौ भवन्तौ, मूर्ध्नो वा न किञ्चिद्विकारः ?

उभौ—भोः स्वस्थावेवावाम्, न किञ्चिन्मूर्ध्नो विकारः।

वि—अहो अच्चरिअं! अच्चरिअं! एवं णाम अवरिक्खदपइदित्थसरीरा चिट्ठंति। (अहो आश्चर्यमाश्चर्यम्! एवं नाम अपरिक्षतप्रकृतिस्थशरीरौ तिष्ठतः)

रा—किमत्राश्चर्यम् (कुमारौ निर्दिश्य) स्वस्त्ययनपरिगृहीतानि तपश्शरीराणि। पश्य—

अपि नाम शरा मोघास्तपस्सन्नद्धमूर्तिषु।
वासवस्यापि सुव्यक्तं कुण्ठाः कुलिशकोटयः॥ १४॥

(कुमारावुद्दिश्य)

किं भवद्भ्यामन्यवहिता भूमिरध्यास्यते ?

उभौ—महाराज, प्रथमपरिणी(ण)तोऽयमर्थः।

रा—तथा नाम।

वि—भो राअ, अदिही खु एदे, ता करिदु संकहाहिं आहिहेअं । (भो राजन्, अतिथी खल्वेतौ, तत् करोतु संकथाभिरातिथेयम् (थ्यम्)

रा—एष भवतोः सौन्दर्यावलोकनजनितेन कौतूहलेन प्रतार्यमाणः पृच्छामि, कतमो वर्ण आश्रमो वा भवतोर्जन्मदीक्षाभ्यामलङ्क्रियते ?

कु—(संज्ञया लवमादिशति)

ल—द्वितीयो वर्णः प्रथम आश्रमः ।

रा—नैतावग्रजन्मानौ, तदल्पोऽपराधः प्रणामप्रयोगो न्यूनासनपरिग्रहश्च । अथ क्षत्रियकुलपितामहयोः सूर्याचन्द्रमसोः को वा भवतोर्वंशस्य कर्ता ?

ल—भगवान् सहस्रदीधितिः ।

रा—कथमस्मत्समानाभिजनौ संवृत्तौ !

वि—किं दोण्णं वि एक्कं एव्व पडिवअणं । (किं द्वयोरप्येकमेव प्रतिवचनम्)

रा—कच्चिदस्ति युवयोर्मिथों यौनः संबन्धः ?

ल—भ्रातरावावां सौदर्यौ ।

रा—संवादी सन्निवेशः, वयसस्तु न किंञ्चिदन्तरम् ।

ल—आवां यमलौ ।

रा—सम्प्रति युज्यते, को भवतोर्ज्यायान्, किं नामधेयम् ?

ल—(अञ्जलिना निर्दिश्य) आर्यस्य पादपूजनायां लव इत्यात्मानं श्रावयामि, आर्योऽपि गुरुचरणवन्दनायां—(अप्रतिपत्तिं नाटयति)

कु—अहमपि कुश इत्यात्मानं श्रावयामि ।

रा—अहो ! उदात्तरम्यः समुदाचारः ।

वि—जाणिदं णामहेअं, को जेट्ठोत्ति ण दिण्णं पडिवअणं ।

(ज्ञातं नामधेयम्, को ज्येष्ठ इति न दत्तं प्रतिवचनम्)

रा—नन्वञ्जलिनिर्देशादनामग्रहणाच्च दत्तमेव प्रतिवचनं कुशो ज्यायानिति ।

वि—साहु जाणिदं संपदं । (साधु ज्ञातं साम्प्रतम्)

रा—किन्नामधेयो भवतोर्गुरुः ?

ल—ननु भगवान्वाल्मीकिः ।

रा—केन संबन्धेन ?

ल—उपनयनोपदेशेन ।

रा—अहमत्रभवतोः शरीरस्य धातारं पितरं वेदितुमिच्छामि ।

ल—न हि जानाम्यस्य नामधेयम्, न कश्चिदस्मिंस्तपोवने तस्य नाम व्यवहरति ।

रा—अहो माहात्म्यम् ।

कु—जानाम्यस्य नामधेयम् ।

रा—कथ्यताम् ।

कु—निरनुक्रोशो नाम ।

रा—(विदूषकमवलोक्य) अपूर्वं खलु नामधेयम् ।

वि—(विचिन्त्य) एव्वं दाव पुच्छिस्सं । णिरणुक्कोसोत्ति को एव्व भणादि ? (एवं तावत् पृच्छामि । निरनुक्रोश इति क एवं भणति ?)

कु—अम्बा ।

वि—किं कुविदा एव्वं भणादि, आदु पइदित्था ? (किं कुपितैवं भणति उत प्रकृतिस्था ?)

कु—यद्यावयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदैवमभिधत्ते-पति-निरनुक्रोशस्य पुत्रौ मा चापलम्-इति ।

वि—एदाणं जदि पिदुणो णिरणुक्कोसोत्ति णामहेअं, एदाणं जणणी तेण अवमाणिदा णिव्वासिदा, तस्स अप्पवहंती एदिणा वअणेण दारएं णिब्भच्छदि। (एतयोर्यदि पितुः निरनुक्रोश इति नामधेयम्, एतयोर्जननी तेनावमानिता निर्वासिता, तस्याप्रभवन्ती एतेन वचनेन दारकं निर्भर्त्सयति)

रा—सम्यगुपलक्षितं कौशिकेन (निश्वस्य) धिङ्मामेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति (सबाष्पमवलोकयति) अपि सन्निहितस्तत्रभवान् निरनुक्रोशो युष्मदाश्रमे ?

ल—न सन्निहितः।

रा—(ससम्भ्रमं) अपि श्रूयते ?

ल—(कुशमवलोकयति)

कु—न तस्य पादावस्माकं नमस्कृतपूर्वौ। अम्बायाः पुनरेकवेणीसंसूचितानि तस्योच्छ्वासितानि।

रा—किं वा भवन्तौ तेनाघ्रातपूर्वौ ?

कु—तदपि नास्त्येव।

रा—अतिदीर्घप्रवासोऽयं दारुणश्च, यदियता कालेन नाम परस्परलोचनगोचरमपि नावतीर्णा यूयम्। (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि। न युक्तं च मम स्त्रीगतमनुयोक्तुम् विशेषतस्तपोवने। तत्कोऽत्राभ्युपायः ?

वि—(जनान्तिकं) अप्पाडिहदवअणमहत्तणा हि बम्हणजादी, अहं उण पुच्छिस्सं (प्रकाशं) भो किण्णामहेआ तुह्माणं जणणी ? (अप्रतिहतवचनमहत्त्वा हि ब्राह्मणजातिः, अहं पुनः पृच्छामि। (–) भो किंनामधेया युवयोर्जननी ?)

ल—तस्या द्वे नामनी ।

वि—कहं विअ ? (कथमिव ?)

ल—तपोवनवासिनो देवीति नामाह्वयन्ति, भगवान्वाल्मीकिर्वधूरिति ।

रा—कतमं क्षत्रियकुलं वाल्मीकिमुनिमुखनिर्गतेन वधूशब्देन वर्धते ?

वि—वित्थिण्णं खत्तिअकुळं ति ण जाणीअदि कदमं खत्तिअकुळं ति ।
(विस्तीर्णं क्षत्रियकुलमिति न ज्ञायते कतमं क्षत्रियकुलमिति)

रा—अपि च, इतस्तावद्वयस्य, मुहूर्तमात्रम् ।

वि—(उपसृत्य) आणवेदु भवं । (आज्ञापयतु भवान्)

रा—अपि कुमारयोरनयोरस्माकं च सर्वाकारसंवादी कुटुम्बवृत्तान्तः?

वि—कहं विअ । (कथमिव)

राम—पश्य, एतयोः सीतागर्भस्य च तुल्यः कालातिपातः, एतावपि क्षत्रियौ सूर्यान्वयौ, अजातप्रोषितौ च निर्विकारौ राजासनारोहणे, पितरि चानयोर्दारुणत्वसूचनो निरनुक्रोशशब्दः, मातुश्च माहात्म्यविभावनो देवी-शब्दः । सर्वथाहमनेन सादृश्यबाहुल्येन पर्याकुलोऽस्मि मन्दभाग्यः ।

(वैक्लब्यं नाटयति)

वि—किं तव ईरिसो अहिप्पाओ सीदागब्भगदा एदे दारआ त्ति ?
(किं तवेदृशोऽभिप्रायः, सीतागर्भगतावेतौ दारकाविति ?)

रा—मा मैवम् । कथं हन्त ! तपोवनवासिनि जने सम्बन्धमीदृशमध्या-रोपयामि । किन्तु—

एतत्कुमारयुगलं वयसान्वयेन
श्यामोन्नतेन वपुषा विपदानया च ।
तां मैथिलीं तनयसंभविनीमवस्था-
मादाय मामतितरां तरलीकरोति ॥ १९ ॥

(चिन्ताशोकं नाटयति) (नेपथ्ये)

भो भोः कोऽत्र संनिहितस्तत्रभवतोरिक्ष्वाकुकुलकुमारयोः कुशलवयोः ।

उभौ—(आकर्ण्य) द्वावप्यावां संनिहितौ ।

(पुनर्नेपथ्ये)

किमितीयतीं वेलां नियोगः प्रत्युदास्यते ?

वाल्मीकिना मुनिवरेण महारथस्य
यासौ पुराणपुरुषस्य कथा निबद्धा ।
सा राघवश्रुतिपथातिथितां च नेया
कालश्च मध्यसवनस्य न लङ्घनीयः ॥ १६ ॥

उभौ—राजन्, उपाध्यायदूतोऽस्मान् त्वरयति ।

रा—मयापि संभावनीय एव महार्थसंविधायी मुनिनियोगः तथा हि—

भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधि-
र्गिरां संदर्भोऽयं प्रथममवतीर्णो वसुमतीम् ।
कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं
पुनाति श्रोतारं रमयति च सोऽयं परिकरः ॥ १७ ॥

वयस्य, अपूर्वोऽयं मानवानां सरस्वत्यवतारः, तदहं सुहृज्जनसाधारणं श्रोतुमिच्छामि । संनिधीयन्तां सभासदः, प्रेष्यतामस्मदन्तिकं सौमित्रिः अहमप्येतयोश्चिरासनपरिखेदं पादविहरणेनोपहरामि ।

(इति निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः

अथ षष्ठोऽङ्कः

(ततः प्रविशति कञ्चुकी)

क—सम्पादितकौशिकमुखसंक्रान्तपार्थिवाज्ञोऽहमत्र स्थितं स्वामिनमवलोकयामि (विलोक्य) एष प्राप्त एव स्वामी—

महाशीलैस्त्रिभिः सार्धमित एवाभिवर्तते ।
परिष्कृतस्त्रिभिर्वेदैरश्वमेध इवाध्वरः ॥ १ ॥

(ततः प्रविशति कुशलवाभ्यामनुगम्यमानो रामभद्रो लक्ष्मणश्च)

सर्वे—(परिक्रामन्ति)

क—(उपसृत्य) जयत्वार्यः, एतत्सज्जमास्थानमण्टपम्, एतदासनं च । (सर्वे उपविशन्ति)

क—इतस्तावदवलोकयतु देवः, एते राघवाः पौरजानपदाश्च देवं संभावयन्ति ।

रा—(दृष्ट्वा) किमिदमपरमस्मदन्तिकाद्यवनिकया तिरोधीयते ?

क—एतास्तिस्रो महादेव्यः कौसल्याद्या महीपतेः ।
एतद्भरतशत्रुघ्नलक्ष्मणानां वधूत्रयम् ॥ २ ॥

लक्ष्म—(कञ्चुकिनमुद्दिश्य) आर्य, वैदेही च न देवीषु सङ्ख्यायते, न वधूषु च ।

रा—(निश्वस्य) कञ्चुकिन्, गच्छ त्वं स्वभूमिमध्यास्व ।

क—यदाह (इति निष्क्रान्तः)

रा—आर्यौ, प्रस्तूयताम् ।

कुशलवौ—

उपयेमे ततस्तिस्रो धर्मपत्नीर्महीपतिः ।
कौसल्यामथ कैकेयीं सुमित्रा च सुमध्यमाम् ॥ ३ ॥

रामलक्ष्मणौ—(सहर्षम्) तात एव कथानायकतामुपनीतः कविना (उभौ नमस्कृत्यासनादवतरतः)

कुशलवौ—कौसल्या सुषुवे रामं—

लक्ष्म—(प्रणमति)

कुशलवौ—कैकयी भरतं ततः ।
सुमित्रा जनयामास यमौ शत्रुघ्नलक्ष्मणौ ॥ ४ ॥

रा—(लक्ष्मणमालिङ्गति)

कुशलवौ—उमयेमे ततः सीतां रामः सौमित्रिरूर्मिलाम् ।
तथा भरतशत्रुघ्नौ कुशध्वजसुते उभे ॥ ५ ॥
बाल्ययौवनयोर्मध्ये वर्तमाना नृपात्मजाः ।
नवयोत्कण्ठया चैव कलत्रे दुःस्थितां ययुः ? ॥ ६ ॥

लक्ष्म—रमणीयः ।

रा—अलं कालातिपातेन, गीयताम् ।

जरसा पलितस्तातः काकपक्षधरा वयम् ।
जानुदघ्नास्तदा तेऽपि साकेतोद्यानपादपाः ॥ ७ ॥

कुशलवौ—अथाभिषेकसंभारे रामस्य समुपस्थिते ।
भरते मातुलं द्रष्टुं मातामहपुरं गते ॥ ८ ॥

रा—आत्मगतम् नियतं मध्यमाम्बा निन्द्यते । (प्रकाशम्) तमुद्देशमुल्लङ्घ्य सीतापहरणात्प्रभृति गीयताम् ।

कुशलवौ—कालेन रूपसौन्दर्यं श्रुत्वा शूर्पणखामुखात्
जहार देहं सीताया न चारित्रं दशाननः ॥ ९ ॥

लक्ष्म—(राममवलोकयति)

कुशलवौ—ततो बध्वार्णवे सेतुं निहत्य युधि रावणम् ।
सीतामादाय रामोऽपि साकेतं पुनरागतः ॥ १० ॥

रा—अहो ! संक्षेपः ।

कुशलवौ—प्राप्तराज्यस्ततो रामो जनवादेन चोदितः ।
आहूय लक्ष्मणं प्राह सीता निर्वास्यतामिति ॥ ११ ॥
बाष्पपर्याकुलमुखीमनाथां शोकविक्लबाम् ।
उद्वहन्तीं च गर्भेण पुण्यां राघवसन्ततिम् ॥ १२ ॥
सीतां निर्जनसंपाते चण्डश्वापदसंकुले ।
परित्यज्य महारण्ये लक्ष्मणोऽपि न्यवर्तत ॥ १३ ॥

लक्ष्म—अहो ! अयशोभागी लक्ष्मणः ।

रा—कस्तवात्रापराधः, रामपराक्रमाः खल्वेते गृह्यन्ते । ततः ।

कुशलवौ—एतावती गीतिः ।

रा—(सोद्वेगम्) सौमित्रे, कष्टमापतितम्—

उभौ—ततः प्राणैः परित्यक्ता निराशा जनकात्मजा ।
अप्रियाख्यानभीतेन कविना संहृता कथा ॥ १४ ॥

कुशः—(अपवार्य) महाभागावेतौ सीतासंकथायामत्यन्तविषादिनौ तस्मादनुयोक्ष्ये । (लक्ष्मणमुद्दिश्य) अपि भवन्तौ रामायणकथानायकौ रामलक्ष्मणौ ?

लक्ष्म—कौ (तौ) क्लेशभागिनौ ।

कुश—किं नीता त्वया सीता ?

लक्ष्म—(सलज्जम्) मया मन्दभाग्येन ।

कुश—किं सीता रामस्य धर्मपत्नी ?

लक्ष्म—अथ किम्

कुश—अथ सीतायास्तद्गर्भस्य वा विदितः कश्चिद्वृत्तान्तः ?

लक्ष्म—विदितो युष्मद्गीतेन ।

रा— किमितः पुनः कल्याणमावेदयति ? (विचिन्त्य) एवं तावदनुयोक्ष्ये । आर्यौ, किमेष युवयोरागमावधिः, आहोस्वित्सन्दर्भावधिः ?

कुश—न वयं जानीमः ।

रा—कण्वोऽनुयोक्तव्यः । सौमित्रे, कण्वमाह्वय ।

लक्ष्म—(निष्क्रम्य कण्वेन सह पुनः प्रविष्टः)

कण्व—(विलोक्य)

स एष रामो नयनाभिरामः सीतासुताभ्यां समुपास्यमानः ।
यदृच्छया तिष्यपुनर्वसुभ्यां पार्श्वस्थिताभ्यामिव शीतरश्मिः॥१५॥

लक्ष्म—कण्वोऽयमार्य, संप्राप्तः ।

रा—(प्रणम्य) इदमासनमास्यताम् ।

कण्व—(उपविश्य) यदि रामायणश्रवणकौतुकं श्रूयताम् कुत्रावधिर्-मिहितः कुशलवाभ्यामिति ।

लक्ष्म—"सीतां निर्जनसंपाते" (इति पठित्वा) एष कुशलवयोर्गीतसीमा ।

कण्व—श्रूयतां ततः परम् ।

रा—का गतिः ?

कुशलवौ—रामदाराणां भद्रं गायति ।

कण्व—ततः श्रुत्वा स शिष्येभ्यो वाल्मीकिर्मुनिरुत्तमः ।
स्वयं सीतां समाश्वास्य निनाय स्वं तपोवनम् ॥१६॥

रा—अनुगृहीतं भगवता रघुकुलम्, अभ्युज्जृतोऽस्मि भगवता ।

कुशलवौ—दिष्ट्या कुशलिनो रामदाराः (सर्वे हर्षं नाटयन्ति)

कुश—अपि (यि) वत्स लव, कासौ वाल्मीकितपोवने सीता नाम ?

लव—न काचित्, केवलं गीतिनिबन्धनान्येतानि सीता सीतेत्यक्षराणि ।

रा—ततस्ततः ।

कण्व—परिपूर्णे ततः काले द्यौरिवेन्दुदिवाकरौ ।
सीतापि जनयामास सा यमौ तनयावुभौ ॥ १७ ॥

लक्ष्म—जयत्वार्यः, दिष्ट्या वर्धतां राघवकुलम् ।

कुशलवौ—जयतु महाराजः पुत्रजन्मना ।

रा—(स्वगतम्) अपि नाम कुशलवौ स्याताम् ।

कण्व—जातावस्थोचितं कर्म विदधानो यथाक्रमम् ।
स चकार तयोर्नाम मुनिः कुशलवाविति ॥ १८ ॥

रा—कथमेतावेव सीतातनयौ ? हा पुत्र कुश ! हा पुत्र लव !

लक्ष्म—इयं सा देवीसंभवा आर्यस्यात्मसंक्रान्तिः ।

कुशलवौ—कथमयं सः ! हा तात, त्रायस्व । (सर्वे परस्परमालिङ्ग्य मोहं गच्छन्ति)

कण्व—(सविषादम्) किमेतत् कष्टमापातितम् ।

मया तु मन्दभाग्येन भद्रं तु किल गायता ।
रघुमहीराश्चत्वारो हितेनैकेन पातिताः ॥ १९ ॥

(निर्वर्ण्य) दिष्ट्या श्वासोद्गम इव । अहमेतं वृत्तान्तं भगवते देव्यै च निवेदयामि । (इति निष्क्रान्तः)

(ततः प्रविशति वाल्मीकिः, ससंभ्रमं सीता च)

वाल्मी—वत्से, त्वरस्व, मा परिलम्बिष्ठाः; अप्रतिक्रियमाणा मूर्छा निष्क्रान्तमापद्यते ।

सीता—कहेहि कहेहि परमत्थं, अवि धरन्ति राहवा ?*

(कथय कथय परमार्थम्, अपि ध्रियन्ते राघवाः ?)

वाल्मी—समाश्वासिहि, ध्रियन्ते राघवाः । किमेतान्न पश्यति भवत्युच्छ्वसितान् ?

सीता—दिढं पच्चाइदम्हि तादेण । (दृढं प्रत्यायितास्मि तातेन)

वाल्मी—(अन्वेषणमभिनीय)

मैथिलि पहिणु लोचने ततः (पुनः)
साधु धैर्यमवलम्ब्य यत्नतः (वर्तते) ।
त्वत्कथाप्रलयमातरिश्वना
साधु (पश्य) राघवकुलं निपातितम् ॥ २० ॥

सीता—(सलज्जम्) भअवं अणणुण्णाददंसणा अहं अंअउत्तेण ।

(भगवन्, अननुज्ञातदर्शनाहमार्यपुत्रेण)

वाल्मी—(सावष्टम्भम्) मयि स्थिते को वा अभ्यनुज्ञायाः प्रतिषेधस्य वा । गच्छ, अभ्यनुज्ञातासि वाल्मीकिना मयैतद्दर्शने, उपसर्प निःशङ्कमुपयन्तारम् ।

सीता—(विलोक्य) किं एव्वं वट्टदि, सव्वहा हदम्हि मन्दभाआ ।

(पतित्वा रोदिति)

(किमेवं वर्तते, सर्वथा हतास्मि मन्दभाग्या)

वाल्मी—उत्तिष्ठ, समाश्वासय, अहमपि रामलक्ष्मणावभ्युपपत्स्ये । वत्स राम, वत्स लक्ष्मण, समाश्वसिहि ।

सीता—जाद कुस, जाद ळव, समस्सस समस्सस ।

(जात कुश, जात लव, समाश्वसिहि समाश्वसिहि)

(एवं सलिलसेकं नाटयति)

राम—(प्रत्यागम्य) आर्य कण्व, अपि ध्रियते वैदेही ?

वाल्मी—पुरत एव वर्तते ।

रा—(विलोक्य) कथं भगवान् संप्राप्तः । (लज्जां नाटयति)

वाल्मी—अलं लज्जया, कलत्रविषया खल्वनुकम्पा ।

लक्ष्म—(आश्वस्य) अपि प्रत्यागतसंज्ञ आर्यः स्यात् ?

रा—प्रत्यागतोऽस्मि मन्दभाग्यः ।

कुशलवौ—(समाश्वस्य) हा तात, परित्रायस्व । (इति पादयोः पतित्वा रुदतः)

रामलक्ष्मणौ—(परिष्वज्य समाश्वासयतः) वत्सौ, अलमावेगेन ।

वाल्मी—हा तातदर्शनदुर्ललितौ, कस्य क्व रुद्यते, प्रमृज्यतामश्रु ।

कुशलवौ—(बाष्पं प्रमृज्य राममवलोकयन्तौ स्थितौ)

सीता—(अपवार्य) को एसो, जो तुह्मेहिं एव्वं पेक्खिदो ?

(क एषः, यो युवाभ्यामेवं प्रेक्षितः?)

राम—अहो ! औदासीन्यं वैदेह्याः, यदि या (यं) चिरकालोपनतमस्मत्सन्निधानं मुखविकासेनापि न संभावयति ।

वाल्मी—(सकोपम्) हे राजन्, धृतसौहार्द, महाकुलीन, समीक्ष्यकारिन्, किं युक्तं तव प्रतिपादितां जनकेन, गृहीतां दशरथेन, कृतमङ्गलामरुन्धत्या, विशुद्धचारित्रां वाल्मीकिना, भावितशुद्धिं विभावसुना, मातरं कुशलवयोः, दुहितरं भगवत्या विश्वंभरायाः, देवीं सीतां जनापवादमात्रश्रवणेन निराकर्तुम् ?

राम—(वैक्लव्यं नाटयति)

वाल्मी—सौमित्रे, युक्तमिदम् ? अथ वा कस्तवोपालम्भः, नियोज्यस्त्वं कनीयान् । (राममुद्दिश्य) अथ दशग्रीववीरवध्यावसाने सीताप्रतिग्रहं प्रति कः प्रमाणीकृतो देवः प्रमाणेन ?

राम—भगवान् वैश्वानरः ।

वाल्मी—भोः प्रत्ययनिवृत्तेः किं कारणम् ?

सीता—हद्धि हद्धि मम अधण्णाए किदे एव्वं अदिक्खिअदिं अंअउत्तो ।

(कर्णौ पिदधाति)

(हा धिक् हा धिक् ममाधन्यायाः कृते एवमधिक्षिप्यते आर्यपुत्रः)

वाल्मी—कुशलवजननीविशुद्धिसाक्ष्ये
पवनसखा यदि देवता नियुक्ता ।
कथमिव भवतो निरङ्कुशोऽयं
हृदि निहितो नु पृथग्जनापवादः ॥ २१ ॥

राम—आयुज्यमानमिव ।

वाल्मी—कथं वीरहस्तेन मामतिवाहयति ।

अनुकृतिसरले पृथग्जनानां
निवसति चेतसि संश्रितोऽनुरागः ।
नरपतिहृदयेन जातमार्द्यं (?)
न हि पुलिनेषु तिलस्य संभवोऽस्ति ॥ २२ ॥

वत्स, किमनेन कण्डूयनेन, गृहाण कुशलवौ, गच्छामः स्वमाश्रम-पदम् (इति परिक्रामति)।

रामलक्ष्मणौ—प्रसीदतु गच्छतु भगवान् ।

वाल्मी—(प्रतिनिवृत्त्य) वैदेहि,

तपोवनगतानामपि दण्डं समाज्ञापयति, तत्परिशोध्यतामात्मा ।

सीता—अहं किं परिबोधेमि । (अहं किं परि....धयामि)

वाल्मी—अपापा भवसि ।

सीता—(सलज्जम्) जणमज्झगदा एव्वं भणामि—मन्दभाइणी विदे-हराअतणआ अहिण्णचारित्तेत्ति । (जनमध्यगता एवं भणामि मन्दभागिनी विदेहराजतनया अभिन्नचारित्रेति)

वाल्मी—समुद्घुष्यतां विकारानुरूपः प्रतिकार इति ।

सीता—पहवदि गुरुणिओओ । (अञ्जलिं बध्वा दिशो विलोक्य) सुण्णंतु भवन्तो लोअपाळा गअणमज्झचारिणो देवदाओ गन्धव्वसिद्धवि-

ज्झाधरा जो अ प्पवाहपच्चक्खीकिदसव्वळोअरहस्सा वम्मीइविस्समित्तवसि-
ट्ठप्पमुहा महेसिणो एसो सअळळोअसुहासुहकम्मसक्खी भअवं राहव-
उळपिदामहो सहस्सरस्सि अ सीदा चारित्तसुद्धिं अन्तरेण एव्वं सच्चावणदि ।

(प्रभवति गुरुनियोगः । (–)शृण्वन्तु भवन्तो लोकपाला गगनमध्यचारिणो देवता गन्धर्वसिद्धविद्याधरा ये च प्रभावप्रत्यक्षीकृतसर्वलोकरहस्या वाल्मीकि-विश्वामित्रवसिष्ठप्रमुखा महर्षय एष सकललोकशुभाशुभकर्मसाक्षी भगवान् राघवकुलपितामहः सहस्ररश्मिश्च सीता चारित्रशुद्धिमन्तरेण एवं सत्यापयति)

वाल्मी—पश्यन्तु भवन्तः महाप्रभावाकृष्टमपि ? सीतामाहात्म्यसंभृतमा-श्चर्यम्

सर्वे—(सविस्मयम्) आश्चर्यमाश्चर्यम् ! एष हि देवीवचनस्य समनन्तरं दत्तावधान इव निःशब्दप्रशान्तो निवृत्तसर्वारम्भः कृत्स्न एव स्थावरजङ्गमो लोकः संप्रवृत्तः । तथा हि—

उदन्वन्तः शान्ताः स्तिमिततरकल्लोलवलया
निरारम्भो व्योम्नि प्रकृतिचपलोऽप्येष पवनः ।
प्रवृत्ता एतस्मिन्निभृततरकर्णा गजघटा
जगत् कृत्स्नं जातं जनकतनयोक्तावबाहितम् ॥ २३ ॥

सीता—जदि मए सअललोअमहत्थप्पच्चआपूरिदगुरुसासणं उम्मु-ल्लिअमहामहीहरसहस्सविरइदसेदुबन्धविभत्तमहासमुद्दम् सुरासुरभुवणेक्क-धणुद्धरं राहवकुलणंदणं तुमं उज्झिअ पइव्वदाविरुद्धेण भावेण अण्णो को वि णअणेहिं णिव्वण्णिदो, वअणेण आलविदो, हिअएण वा चिंतिदो, एदिणा सच्चवअणेण सअललोअपच्चक्खदीसमाणदिव्वरूपधारिणी भअवदी महप्पहावा चित्तशुद्धिं मे लोअस्स पआसीकरोदु (पअडीकरोदु)

(सर्वे संभ्रमं नाटयान्ति)

(यदि मया सकललोकमहार्थप्रत्ययापूरितगुरुशासनं उन्मूलितमहा-महीधरसहस्रविरचितसेतुबन्धविभक्तमहासमुद्रं सुरासुरभुवनैकधनुर्धरं राघ-

वकुलनन्दनं त्वामुज्झित्वा पतिव्रताविरुद्धेन भावेनान्यः कोपि नयनाभ्यां निर्वर्णितः, वचनेनालपितः, हृदयेन वा चिन्तितः, एतेन सत्यवचनेन सकललोकप्रत्यक्षदृश्यमानदिव्यरूपधारिणी भगवती महाप्रभावा चित्तशुद्धिं मे लोकस्य प्रकाशीकरोतु)

वा—किमेतदव्यक्तभीषणं लोकस्य रसान्तरमाविर्भूतम् ।

नादः पातालमूलात्प्रभवति ककुभः (तुमुलं) पूरयन् व्योमरन्ध्रं
पात (?) क्लिष्टा इवैते दिशि दिशि गिरयो मन्दमन्दाश्चरन्ति ।
बद्धानन्दाः समन्ताल्लवणजलधयो मथ्यमाना इवासन्
सीतामुल्लंघ्य वेगादुदनिधिसलिलैः स्वानि वेलावनानि॥२४॥

सीते, त्वामुद्दिश्य प्रादुर्भूतानि सर्वलक्षणानि पुनरप्यावर्ततां सत्यम् ।

सी—("जइ मए सअललोअ" इत्यादि पठति)

(नेपथ्ये)

स्वस्ति गोभ्यः, स्वस्ति ब्राह्मणेभ्यः, स्वस्ति राघवकुलाय ।

आकृष्टा मिथिलाधिराजतनयासत्येन पातालत-
स्तोयान्मज्जनलीलया तनुमिमां हित्वात्मनः स्थावराम् ।
साक्षाल्लक्षितदिव्यमूर्तिमहिमायोगेन विश्वंभरा
लोकं मध्यममम्बुराशिरशना देवी समारोहति ॥ २५ ॥

सर्वे—(आकर्ण्य विस्मयं नाटयन्ति)

वा—कथमदृष्टपूर्वा अश्रुतपूर्वा इयमाश्चर्यपरम्परावृत्तिः ।

एतज्ज्योतिरुदेति नागभवनात्संवासयन्तश्चिरा-
न्माल्यैः शीतलपद्मगन्धिसुभगाः पातलवाता दिशः ।
एषाविर्भवति क्रमेण वसुधा राजन् दधानाञ्जलिं
सौमित्रे प्रणमादरात् कुशलवौ पुष्पाञ्जलिः क्रीयताम् २६

सर्वे—(यथोक्तं नाटयन्ति)

(ततः प्रविशति पातालोद्भेदं नाटयन्ती पुष्पवर्षाभिर्नारीभिः सह समानो-दात्तोज्ज्वलवेषाभिश्च पृथ्वी)

सर्वे—(कृताञ्जलयः)

त्वं बिभर्षि जगत्कृत्स्नं शेषमूर्ध्ना त्वमुह्यसे ।
काम्यानभिमतान् देवास्त्वामेव दुदुहुः पुरा ॥ २७ ॥
उन्नतौ विन्ध्यकैलासौ तव देवि पयोधरौ ।
जाह्नवी हारयष्टिस्ते समुद्रा रत्नमेखलाः ॥ २८ ॥
यज्ञाङ्गानां समुत्पत्त्यै वासवस्त्वां प्रवर्षति ।
रत्नानामोषधीनां च त्वां प्रसूतिं प्रचक्षते ॥ २९ ॥

नमो भगवत्यै विश्वंभरायै । (प्रणमन्ति)

पृथ्वी—(दिशो विलोक्य) अहो ! अनतिक्रमणीयं शासनं प्रति-निवृत्तानां पतिव्रतानाम् ।

व्याप्य द्यावापृथिव्यौ प्रतिहतगतयो यत्र भानोर्मयूखाः
गाम्भीर्याक्षीणवेगो नियमयति गतिं यच्च वोढुं गरुत्मान् ।
यत् स्थानं विप्रकर्षात् परिमिततपसां योगिनामप्यगम्यं
तस्मादाकृष्य साहं जनकतनयया दूरमारोपितास्मि॥३०॥

तत्तामेवाभिभाषिष्ये । वत्से, मैथिलि, कर्तव्यतां केनार्थयसि ?

सीता—(सविस्मयं विलोक्य) भअवदि, का तुमं ? (भगवति, का त्वम्)

पृथ्वी—किं न मां वेत्ति भवती ?

मामामनन्ति मुनयः प्रणवद्वितीयां
मत्तः प्रसूतिरखिलस्य चराचरस्य ।
मय्येव सिध्यति तपोऽवनिदेवतां त्वं
जानीहि जानकि तवान्तिकमागतां माम् ॥ ३१ ॥

अपि च, वत्से, ज्ञायतामिदमपि ।

अभ्युद्धतिश्च सहसा ममैवेयमनुष्ठिता ।
पुरा महावराहेण त्वत्प्रभावेन साम्प्रतम् ॥ ३२ ॥

सीता—(अञ्जलिं बध्वा) भअवदि, अणुकम्पं अज्झासिअ जह तुए एव्वं चारित्ताविकळत्तेणेण अहिळक्खिदा तह लोअस्स पआसीअदु ।

(भगवति, अनुकम्पां अध्यास्य यथा त्वयैवं चारित्राविकलत्वेनाभिलक्षिता तथा लोकस्य प्रकाश्यताम् ।

पृथ्वी—तथास्तु । (समन्तादवलोक्य)

ऋषयो दानवाः सिद्धा यक्षगन्धर्वकिन्नराः ।
मानवा लोकपालाश्च भवन्त्ववहिताः क्षणम् ॥ ३३ ॥
रामं दाशरथिं मुक्त्वा न जातु पुरुषान्तरम् ।
मनसापि गता सीतेयेवं विदितमस्तु वः ॥ ३४ ॥

(आकाशात् पुष्पवृष्टिः दुन्दुभिध्वनयश्च)

सर्वे—(सहर्षम्) अहो ! विस्मयः । वसुन्धरासम्पादितशुद्धिमनुवर्तन्ति बहुविधान्येतानि प्रादुर्भवन्ति—

आशामुखे त्रिदशदुन्दुभयो ध्वनन्ति
व्योम्नः पतन्ति कुसुमानि निरन्तराणि ।
आकस्मिकोऽप्युपरि धार्यत एव देव्याः
केनाप्यबध्यवितते गगने वितानः ॥३५॥

(नेपथ्ये)

जयति दशरथः स सत्यसन्धो
जयति तथैकधनुर्धरश्च रामः ।
जयति रघुकुलं कलङ्कमुक्तं
जयति चरित्रगुणोन्नता च देवी ॥३६॥

पृथ्वी—अपि शुद्धिमती वैदेही ?

सर्वे—(कृताञ्जलयः)

या स्वयं प्रकृतिनिर्मला सती
छाद्यतेऽन्यजनवादवारिदैः ।
जानकी भगवति त्वयाद्य सा
चन्द्रिकेव शरदा विशोधिता ॥ ३७ ॥

(प्रणमन्ति) अपि नाम आश्चर्यं मिथुनं भूयः संयुज्यते !

वाल्मी—भो भोः कौसल्यामातः, संभाव्यतां सीता परिशुद्धिपरिग्रहेण ।

राम—यदाज्ञापयन्ति गुरवः । वत्स, लक्ष्मण, क्रियतां पादप्रणामः ।

सीता—(अञ्जलिं बध्वा सहर्षम्) जेदु अंअउत्तो ।

(जयत्वार्यपुत्रः)

वाल्मी—अहो ! उदात्तशालीनः प्रतिग्रहप्रकारः ।

लक्ष्म—(सहर्षं सलज्जं च) आर्ये, वध्यः पातकी लक्ष्मणः प्रणमति ।

सीता—कीस तुए अप्पा णिंदिअदि, एव्वं अप्पगुरुणिओअवट्टी चिरं जीव । (कुतस्त्वया आत्मा निन्द्यते, एवमात्मगुरुनियोगवर्ती चिरं जीव)

वाल्मी—वत्स राम, अनेन गृहीता वैदेही, स्वयमाभाष्य पाणिना पाणौ संगृह्य नियुज्यतां यज्ञाधिकारे ।

राम—(लज्जां नाटयति)

वाल्मी—अलं लज्जया, यज्ञाङ्गं विना किं वा अपूर्वं दाशरथेः सर्वसाक्षिकं पाणिग्रहणमिति ?

राम—समाचारोऽयं गुरुनियोगश्च (सीतां पाणौ गृहीत्वा) भद्रे वैदिहि,

अपत्यमिष्टं च वदान्ति देवाः
फलद्वयं दारपरिग्रहस्य ।
पूर्वं तयोस्त्वय्युदपादि हृद्यं
वहस्व वासे भवने द्वितीयम् ॥३८॥ (?)

सीता—जं अंअउत्तो आणवेदि । उच्छासिओ मे अप्पा । पच्छागदा मे पाणा । (यदार्यपुत्र आज्ञापयति । उच्छ्वसितो मे आत्मा । प्रत्यागता मे प्राणाः)

पृथ्वी—अविघ्नमस्तु यज्ञानां काले वर्षतु वासवः ।
निरातङ्काः प्रजाः सन्तु सीतारामसमागमात् ॥३९॥

(अन्तर्धानं नाटयन्ती निष्क्रान्ता)

राम—कथमन्तर्भूता वसुमती !

वाल्मी—अनतिदीर्घसन्निधाना हि देवताः ।

राम—भगवताहमप्यनुज्ञातो लक्ष्मणमभिषेक्तुमिच्छामि ।

लक्ष्म—(अञ्जलिं बध्वा) यदि प्रसन्नमार्येण, तेन तनयसंक्रामिणा युवराजशब्देन विभज्यतां चिरकालानुचरः सौमित्रिः ।

वाल्मी—इक्ष्वाकुकुलसदृशमभिहितम् ।

राम—का गतिः, अनतिक्रान्तैव रामेण लक्ष्मणप्रार्थना । अवश्यं चेदिदं कर्म वत्सस्य, तदहमेव तत्प्रतिपत्स्ये । सौमित्रे, आनीयतामभिषेकसंभारः ।

लक्ष्म—आर्य, सम्पादितं सर्वमभिषेकसमयोचितं व्यग्रहस्ताभिर्देवताभिः । पश्य—

एष च्छत्रं वहति भगवान् वासवश्चन्द्रगौरं
देवी वालव्यजनयुगलं जह्नुकन्या शची च ।
अम्भोगर्भान् कनककलशान् धारयन्ति प्रजौघा-
श्चित्रं नैतत् प्रणयसुलभाः सम्पदस्तद्विधानाम् ॥४०॥

राम—आवयोस्तर्हि वेत्राधिकारः ।

लक्ष्म—अनुगृहीताभियोगः संविभागः ।

राम—लक्ष्मण, वेत्रं धारय । (वाल्मीकिमुद्दिश्य) भगवन्नभिषिच्यतां नप्ता ।

वाल्मी—(कलशमादायोपसर्पन्) भो भोः साकेतनिवासिनः पौराः, नानादिगन्तवासिनो राजानः, विभीषणसुग्रीवहनुमत्प्रभृतयो महारथाः, शृण्वन्तु भवन्तः—

मैथिलीतनयः श्रेष्ठः कुशो नाम महारथः ।
अभिषिक्तोऽद्य साम्राज्ये मान्यतामस्य शासनम् ४१ ॥
पुरन्दरस्य यत् स्वर्गे पाताले यच्च वासुकेः ।
पृथिव्यां यच्च मान्धातुस्तदस्तु तव मङ्गलम् ॥ ४२ ॥

(अभिषेकं नाटयति)

(नेपथ्ये कलकलः)

जय जय महाराज ।

सीता—पिअं मे दिट्ठिआ संउत्तं । (प्रियं मे दिष्ट्या संवृत्तम्)

रामः—पूर्णास्ते लक्ष्मणस्य मनोरथाः ।

सर्वे—(हर्षं नाटयन्ति)

राम—(कुशमुद्दिश्य) राजन्, त्वयाहमभ्यनुज्ञातो यौवराज्ये लवमभिषेक्तुमिच्छामि ।

कुश—यदाज्ञापयति देवस्तातः ।

राम—प्रकामम् (कलशमानीय)

महाराजकुशस्यायं लवो नाम प्रियानुजः ।
मया तद्वचनादेव यौवराज्येऽभिषिच्यते ॥ ४३ ॥

सर्वे—(यथोचितं हर्षं नाटयन्ति)

वाल्मी—किं ते भूयः प्रियमुपहरामि ।

रामः—त्वद्दर्शनेन विधिना परिशुद्धवृत्ति-
जर्नता महाध्वरसखी मम सैव पत्नी ।
न्यस्तं च सूनुयुगलं भुवनाधिकारे
किं स्यादतः प्रियतमं गुरुणाभिधेयम् ॥ ४४ ॥

वाल्मी—तथापीदमस्तु—

स्थाणुर्वेधास्त्रिधामा मकरवसतयः पावको मातरिश्वा
पातालं भूर्भुवस्त्रयश्चतुरुदधिसमाः साममन्त्राश्च वेदाः ।
सम्यक्संसिद्धिविद्यापरिणततपसः पीठिनस्तापसाश्च
श्रेयांस्यस्मिन्नरेन्द्रे विदधतु सकलं वर्धतां गोकुलं च॥४५॥

(इति निष्क्रान्ताः सर्वे)

षष्ठोऽङ्कः

॥ कुन्दमाला समाप्ता ॥